मेघदूतटीका व्याख्या

२२८

नं. ४४८६

वस्ता॰ २

१ मेघदूत — पालिराम

मे॰ टी॰ श्री गणेशाय नमः। मेघदूतव्याख्या। काव्यारंभे मंगलं त्रिविधं। आशीर्नमस्क्रियावस्तुनिर्देशात्मकं चेति। अस्मिन्
ग्रंथे वस्तुनिर्देशात्मकं मंगलं आचरन् कविः कथां प्रस्तौति। कश्चिदिति। कश्चिद्यक्षः रामगिर्याश्रमेषु चित्रकूटप
र्वताश्रमेषु वसतिं वासं चक्रे। रामस्य गिरिः रामगिरिः। तस्याश्रमाः रामगिर्याश्रमाः तेषु॰ अद्रिगोत्रगिरिग्राव
चलशैलशिलोच्चयाः इत्यमरः। वसतिः स्यात्स्त्रियां वासे इति विश्वः। क॰ यक्षः। स्वाधिकारप्रमत्तः। स्वस्याधिकारः। स्वा॰ स्वा॰
तस्मिन् प्रमत्तः। कनककमलरक्षणरूपे स्वाधिकारे सावधानरहित इत्यर्थः। पु॰ यक्षः। भर्तुः स्वामिनः कुबेरस्य शापेनास्तं
गमितमहिमा। अस्तं नाशं गमितः महिमा माहात्म्यं यस्य सः। अस्तं॰ अस्तमितमानमव्ययं। क॰ शापेन। कान्तावि
रहगुरुणा। कान्ताविरहगुरुणा। कान्तायाः विरहः। कां॰ तेन गुरुः। प्रियाविरहदुर्भरेणेत्यर्थः। गुरुस्तु गीष्पतौ श्रे
ष्ठे गुरौ पितरि दुर्भरे इति यादवः। पु॰ शापेन। वर्षभोग्येण। वर्षेण भोग्यः। वर्ष॰ तेन॰ संवत्सरभोग्येनेत्यर्थः।
वत्सरे वर्षमस्त्रियामि॰ स॰। क॰ आश्रमेषु॰ जनकतनयास्नानपुण्योदकेषु। जनकस्य तनया॰ ज॰ तनयायाः स्ना
नं॰। तेन पुण्यानि उदकानि येषु ते। ज॰ स्नानपुण्योदकाः। तेषु। कबंधमुदकं पाथः पुष्करं सर्वतोमुखम्
इत्य॰। पु॰ रामगिर्याश्रमेषु। स्निग्धछायातरुषु। स्निग्धघनाः छायाः येषां ते स्निग्धछायातरवो येषु ते स्नि॰ तेषु
तरवः तेषु। सांद्रस्निग्धस्तु मेदुरः इत्य॰। धीमांतः कोपमेदुरः स्यादिवाद्याद्यर्वः छायायां तरवः इति सत्रशाके।

पार्श्विवाद्रिलोत्समासः। कुबेरः कश्चिद्यक्षदेवप्रजाई कनककमलप्रसूतनन्दनकरत्नां आदिदेशास्तवाहनाधिकारेनोतस्त्रिंदिवमव
हितः सन्कतद्दशावकारकदाचित्कांतानुरागेमत्तद्विपोगमसह्मानोरात्रौतद्दशार्धेनगतस्तत्रादिग्गजा। कान्तामप्रत
टाक्षमाकोऽहं पोचयंकुः कनककमलानिचवभंजुः तद्दृत्तांतमाकर्ण्य यक्षराजस्तस्मै चुकोप संवत्सरमेकं कांताविरह
तत्त्वंविगतदैवसामर्थ्योभित्सु वनदेवं संतरे निवसेतितं शापतधा येन सः पुण्यपदेश्रेणीता लाचित्रकूटपर्वतेवासं च
क्रे इतिभावार्थः॥ ॥तस्मिन्निति॥ सः कामीयक्षः आषाढस्य प्रथमदिवसे मेघं ददर्श। कामो स्यास्तीति कामी। आषाढेन
ग्रेण युक्ता पौर्णमासी आषाढी पौर्णमासी यस्मिन्सः आषाढः तस्य। आषाढशब्दात् नक्षत्रेण युक्तः कालः इत्यण्। प्रथमश्चा
सौ दिवसश्च प्रथमदिवसः तस्मिन्। क्लीबे दिवसवासरौ इत्यमरः। अभ्रं मेघो वारिवाहः इत्य०। किं कृत्वा। तस्मिन्नद्रौ चित्रकू
टपर्वते कतिचिन्मासान् अष्टौ मासान् नीत्वा गमयित्वा। कः सः अबलाविप्रयुक्तः। अबलया विप्रयुक्तः। अबलया। स्त्रीरहित इत्य
र्थः। स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः इत्य०। कः सः कनकवलयभ्रंशरिक्तप्रकोष्ठः। कनकस्य वलयः। कन०। तस्य भ्रं
शः। कन०। तेन रिक्तः प्रकोष्ठो यस्य सः। विरहकृशतया प्रकोष्ठात्पतितस्वर्णकंकण इत्यर्थः। स्वर्णं सुवर्णं कनकं हिरण्यं हे
महाटकं इत्य०। करकवलयोः स्त्रियामित्य०। भुजबाहू प्रवेष्टो दोस्स्यात्कफोणिस्तु कूर्परः। अस्याधः प्रगंडः स्यात्प्रकोष्ठस्त
स्य चाप्यधः इत्य०। कं मेघं। आश्लिष्टसानुं। आश्लिष्टः सानुर्येन सः तं। आक्रान्तआलिंगितशिखरमित्यर्थः। सानु
प्रस्थः सानुः स्त्रियामित्यमरः। पुनः मेघं। [illegible] प्रेक्षणीयं। वप्रस्य क्रीडा वप्रक्रीडा। तस्यां परिण

राम २

मे॰टी॰ तस्मात्स्थो गजश्च वप्रक्रीडापरिणतगजः । वप्र॰ गजेन्द्र वप्रक्रीडालीयः । तं । उत्खातपर्वतनटमहागजदर्शनीयमित्यर्थः । उत्खातके
लिः शृंगाद्यैः वप्रक्रीडा निगद्यते । दृष्टिं राजशार्दूलः । तिर्यक् दंतप्रहारस्तु गजः परिणतो मतः । इत्यमरः । गजप्रेक्षणीयमित्यत्र
इवशब्दलोपात् लुप्तोपमालंकारः ॥ ॥ यक्षेति । राजराजस्य कुबेरस्यानुचरः यक्षः अंतर्बाष्पः सन् अंतस्तंभितास्रः सन् रचिर
रकालपर्यंतं दध्यौ चिंतयामास । राज्ञां धनपतीनां राजा राजराजः तस्य । टा आप्रभोः न्द्रपेचं द्रुपदे स्त्रियां चांके योरिति विचिन्त्य । रा
जराजो धनाधिपः इत्य॰ । अंतः पीठं यस्य सः अंतर्बाष्पः । बाष्पमश्रु नेत्राम्भः इत्य॰ । किं कृत्वा तस्य मेघस्य पुरतः अग्रे कथमपि
महताकष्टेन । स्थित्वा । कथं॰ । तस्य । कौतुकाधानहेतोः । कौतुकस्याभिलाषस्याधानं कौतुकाधानं । कौतु॰ नं । तस्य हेतुः । तस्य॰ ।
कामाभिलाषोत्पादनकारणस्येत्यर्थः । कौतुके चाभिलाषे स्यादुत्सवे नर्महर्षयोरिति विश्वः । हेतुर्ना कारणं बीजमित्यम॰ ।
तथा हि । मेघालोके मेघदर्शने सति सुखिनः अपि जनस्य चेतः अन्यथावृत्ति भवति । कंठाश्लेषप्रणयिनि जने प्रियाजने
दूरसंस्थे सति किं पुनः । मेघस्यालोकः मेघालोकस्तस्मिन् । सुखमस्यास्तीति सुखी । तस्य॰ । अन्यथावृत्तिं ग्राम्यार
तिवर्तिनं व्यापारो यस्य तत्तथा अन्यथावृत्ति । कंठस्याश्लेषः कं॰ । कंठाश्लेषे प्रणयो यस्य सः । कंठ॰ । यीतस्मिन् कंठालिंगना
र्थं प्रीतो इत्यर्थः । दूरे संस्थास्थितिर्यस्य सः दूरसंस्थः । तस्मिन् दूरसंस्थे । प्रथमं मेघदर्शने संयोगिनो अपि कामाग्निर्वि
वर्धनं भवति । वियोगिनां तु किमु कथनमिति भावः ॥ ॥ प्रत्यासन्न इति । अतः प्रसन्नः सयक्षः नभसि मेघाय प्रीतिप्रमुख
वचनं प्रेमपूर्वकं वाक्यं व्याजहारेत्यर्थः स्वागतं कुशलप्रश्नानन्तरं तत्पूर्वकं । प्रीतिप्रमुखानि वचनानि यस्मिन् कर्म रुध
णि तत् यथा तथा प्रीतिप्रमुखवचनं उक्त॰ तस्मै ।

२

प्रत्यग्रैः नवीनैः कुटजकुसुमैः कल्पितार्घाय। प्रसन्नो ऽर्घं न दीनो न ओनद्धीनोन्नतनोनवधूपन। कुटजस्य कुसुमानि कु
टजं। नितैः। उपोधकुटजः शाक्रो वत्सको गिरिमल्लिका इत्यमरः। कल्पितः अर्घो येन सः कल्पितार्घः। तस्मै तं। कल्पितार्घा
य रचितपूजाविधये इत्यर्थः। मूल्ये पूजाविधावर्घ इति ॥ किं कारयिषन्। जीमूतेन मेघेन स्वकुशलं मयीआलक्ष्ये म
प्रधानां वल्लिनां नायिकां हरिष्यन् प्रापयिष्यन् स स्वकुशलं स्वकुशलं प्रचुरं यस्यां सा स्वकुशलमयी तां स्वकुश
लं क्षेमम् मल्लिकायाभिल। वार्तां प्रवृत्तिः इत्यमरः। न स लिप्याभावरोप्रसारणं नेसमति निरूढवर्त्तिनि सनिदयितानां जी
वितालंबनार्थीनं भः भावलिंकथ्यसं इत्यमरः। नभः श्रावणे नभः इत्यमरः। दयितायाः जीवितं दयितानां जीवितमेवालंबनं आ
अवसंअवधितुं लंयस्य सः दयितानां जीवितालंबनार्थी कांतानां जीवनापायकांक्षी इत्यर्थः। प्रारणाप्रियामममवतां अप्राप्यप्राणनामू
सजेत। अनोमम सिवार्तां अयं मेघः शीघ्रं नयतु च पुनः जीवनार्थं कर्मजीवनप्रदेनैव कारयितव्यमिति मेघं प्रति प्राप्य ने
तिभावः। आषाढस्य प्रथमदिवसे पूर्वं प्रस्फुटं तत्रच प्रसादसंनेनभासिद्धश्रुतं वियोगिनां मदनां धत्वादिवेकरत्यलाभि
तानिसेधनिवृत्तिः। न तु सचेतनसाध्यमर्थं कथमचेतनेन हारयितुं प्रवर्त्तते सा क्षेपं कविः समाधत्ते ॥ ॥ धूमेति॥
गुह्यकः यक्षः तं मेघं ययाचे प्रार्थयामास। किं कुर्वन्सन् औत्सुक्यात् मिथ्यासंदेशः कथं नो साहुल्लादिति अप्रकारेणाऽप
रिगणयन्सन् उत्सुकस्य भावः औत्सुक्यं तस्मात्। दोषकशब्दो महदंतरं सूचयति। इतीति किं। धूमज्योतिःसलिल
मरुतां संनिपातः समुदायः मेघः क्व ... प्रायः पटुभिः प्राणिभिः बैः प्रापणीयाः संदेशार्थाः क्व॥

राम ३
मे० टी०

धूमज्योतिश्च सलिलं च मरुतश्च धूमज्योतिःसलिलमरुतः तेषां धूमज्योतिःसलिलमरुतां । सलिलं कमलं जलमित्यमरः । पटुभि
करणानि येषां ते तैः । प्रापयितुं योग्याः प्रापणीयाः । संप्रत्युद्दिश्यन्ते इति संदेशाः । संदेशानामर्थाः संदेशार्थाः । हि इति युक्तोये
मर्थः । कामार्ताः पुरुषाः चेतनाचेतनेषु स्थावरजंगमात्मकेषु जीवेषु प्रकृतिकृपणाः स्वभावेनैव दीना भवंति । अचेत
नाश्च चेतनाश्च चेतनाचेतनास्तेषु । प्रकृत्या स्वभावेन कृपणाः कामपीडितस्य यक्षस्य युक्तः । युक्तविवेकशून्यत्वात्
अचेतने मेघे न विरुध्यत इति भावः ॥ ॥जातं वंशे इति ॥ हे मेघ अहं त्वां मघोनः इंद्रस्य प्रकृतिपुरुषं प्रधानपुरुषं जानामि । येन
कारणेन त्वं इंद्रस्य असि । तेन कारणेन अहं त्वयि विधिवशात् दैववशात् अर्थित्वं याचकत्वं गतः । प्रकृतेः पुरुषः प्रकृ
तिपुरुषः तं । प्रधानं प्रकृतिं स्त्रियामित्यमरः । विधेर्वशः विधिवशः तस्मात् । विधिर्विधाने दैवेपीत्यमरः । कामिच्छाप्रभेदयोरि
निर्दिष्टः । कं तं । पुष्करावर्तकानां इंद्रमेघानां वंशे जातं उत्पन्नं । महाकुले प्रसूतमित्यर्थः । पुष्करावर्तकाश्च पुष्करा
वर्तकास्तेषां । यद्वा । पुष्करं जलं आवर्तयंति ते पु० । पुष्करं सर्वतोमुखमित्यमरः । पुष्करं करिहस्ताग्रे वाद्यभांडमुखे जले व्यो
म्नि खड्गफले पद्मे तीर्थौषधिविशेषयोरित्यनेकार्थे । पु० । तं । कामरूपं । कामेनाभिलाषेण रूपं यस्य सः । कामरूपस्तं ।
मघोनः इ० । मघवा बिडौजाः इत्यमरः । कं वंशे । भुवनविदिते । भुवनेषु विदितः प्रसिद्धः । भुवनविदितस्तस्मिन् । विष्टपं भुवनं
जगदित्यमरः । कं अहं । दूरबंधुः । दूरे बंधुर्यस्य सः । दूरस्त्रीक इत्यर्थः । तथाहि । अधिगुणे बहुगुणे याच्ञा प्रार्थना मोघानि
फलापि वरं श्रेष्ठा । अधमे नीचे पुरुषे ...पि वरं श्रेष्ठा न । अधिका गुणा यस्मिन् सः अधि
कगुणस्तस्मिन् । लब्धः कामो यस्यां सा

चंक

ऽन्यकाः। महाकुलप्रसूतस्य तव अंशतोऽहं वस्तुतः देवेन्द्र मन्त्रिलाभेऽपि याचकतां गतः। तं चेत्त्वमुक्तामं विधास्यसि तर्हि वरं नाव
धारस्य विवेकेन ह्यपि वरं महतां पुरुषाणां संभाषणं सकलकामाप्तिकरमिति भावः॥ ॥संतप्तानामिति। हे पयोद मेघ
त्वं संतप्तानां आतपतप्तानां विरहतप्तानां चतुर्णां लोकानां शरणं रक्षकः असि। अतः कारणात् त्वं प्रियायाः संदे
शं हर प्रापय। पयः ददातीति पयोदः तस्य संबोधनं हे पयोद। पयः कीलालममृतं जलमित्यमरः। शरणं गृहरक्षित्रोरित्यनेकार्थः। संदे
शहरणेन तापं नुदेत्यर्थः। कः मे यक्षस्य धनपतिक्रोधविश्लेषितस्य। धनस्य पतिः धनपतिः तस्य क्रोधः धनपतिक्रो
धः तेन विश्लेषितः वियोजितः धनपतिक्रोधविश्लेषितस्तस्य धनदकुबेरकोपेन कान्ताविरहं प्रापितस्येत्यर्थः। को
पक्रोधामर्षरोषप्रतिघ इत्यमरः। कुत्र संदेशं नयामीति संभावनायामाह। हे मेघ यक्षेश्वराणां वसतिं निवासं अलकाना
मपुरी ते तव गन्तव्या। यक्षाणां ईश्वराः यक्षेश्वराः तेषां। वसतिः स्याद्धि रात्र्यां वासे। नेगंतव्याद्दस्यत्र वसा ना
फं तरिवे निसृष्टेन षष्ठी। त्वया गन्तव्येत्यर्थः। कः अलका। बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या। बाह्यं च
तत् उद्यानं च बाह्योद्यानं बाह्योद्याने स्थितश्चासौ हरश्च बाह्योद्यानस्थितहरः। बाह्योद्यानस्थितहरस्य
शिरः बाह्योद्यानस्थितहरशिरः बाह्योद्यानस्थितहरशिरसि चन्द्रिका बाह्योद्यानस्थितहरशिरश्चन्द्रिका। तया धौतानि
हर्म्याणि यस्यां सा बाह्योद्या। इति विरोधकत्वात् सामर्थ्यानि त्याऽबाधितं चन्द्रोदयेन तस्याः संतापा
र्मलीकृतानि हर्म्याणि

रा म ४

मे॰ टी तिरायो ऽप्युपतेभन हमनं तं तापनिवारकमिति भावः। पुमानाक्रीडउद्यानं इत्यमरः। उत्तमांगं शिरः शीर्षं इत्यमरः। चंद्रिका कौमुदी
ज्योत्स्ना इत्यमरः। हर्म्यादि धनिनां वास इत्यमरः। अंबरं गगनं तस्य मे कुबेरकोपकृतं विरहसंतापहरतीति भावः॥ ॥त्वामिति॥ हे मेघ पथि
कवनिताः पथिकनवधूः पवनपदवीं आकाशमार्गं आरूढं त्वां प्रेक्षिष्यंते अवलोकयिष्यंति। पंथानं गच्छंतीति पथिकाः पथिका
[redacted] उद्गृहीतालकान्ता अलकानां अंताः अलकान्ताः उद्गृहीताः हस्तेन सार्धं उद्गृहीताः अलकान्ताः याभिस्ताः उद्गृहीता
लकान्ताः। अलकाश्चूर्णकुन्तला इत्यमरः। पथिकवनिताः प्रोषितभर्तृका इत्यर्थः। पवनस्य पदवी पवनपदवी
तां॰ पंथानः पदवी सृतिरित्यमरः। कः॰ पथिकवनिताः। पुनः॰ पथिकवनिताः। प्रत्ययात् विश्वासात् आश्वसंत्यः। प्राणान् धा
रयंत्यः। प्रियसमागमप्रत्ययात् प्राणान् धारयंत्य इत्यर्थः। प्रत्ययो धीशपथज्ञानविश्वासहेतुष्विति विश्वः। तथा
हि। हे मेघ त्वयि संनद्धे सति विरहविधुरां वियोगव्याकुलां जायां कः उपेक्षेत रक्षितुं कः अपि तु न कोपि। वि
रहेण विधुरा विरहविधुरा तां। तर्हि कथं उपेक्षसे इति चेदत्राह। किं च। अन्योऽपि जनः अहमिव यः पराधीनवृत्तिः न स्यात्।
पराधीना वृत्तिर्यस्य सः पराधीनवृत्तिः। मत्सदृशो हरस्य तव दर्शनात् प्रमदाबलाः प्राणप्रियकाम्या लाधारयिष्यतीति भावः॥
॥त्वामिति॥ अपि ते तव शुभानि हृद्यं ते इत्याह। मंदमिति। हे मेघ अयं अस्मत्सचकः पवनः त्वां मंदं मंदं नुदति प्रेरयति। चपु॰
अयं सगंधः सबंधुः चातकः मधुरं यथा स्यात्तथा नदति कूजति। स्वबंधुजनैरन्वितः चातकः शार्ङ्गकरोतीत्यर्थः। ४
अत्र गंधशब्देन बंधुः। उक्तं च। गंधो गंधक आमोदे लेशे संबंधगर्वयोरिति विश्वः।

क॰ चातकः। ते तव वामः। वामभागस्थः। वामस्तु रम्ये वक्रे स्यात् सव्ये वामे स्थिते पि च इति त्रिकाण्डशेषः। भविष्यच्छुभसूचकं शकुन
माह। हे मेघ नूनं निश्चयेन भवंतं बलाकाः बकपङ्क्तयः सेविष्यंते सेवां करिष्यंति। क॰ बलाकाः। गर्भाधानक्षणपरि
चयात् आबद्धमालाः। गर्भाधानसुखकालस्य परिचयेन बद्धपंक्तयः इत्यर्थः। गर्भस्य आधानं गर्भाधानं गर्भाधानमेव क्षणः उ
त्सवः गर्भाधानक्षणः तस्य परिचयः गर्भाधानक्षणपरिचयः तस्मात् गर्भाधानं। गर्भो पि बलाकानां मेघध्वनिश्रवणेन संभवति
कटेः कुक्षौ कुक्षिस्थजं तोयं चेति विद्यादवः। नित्यं परिरक्षितौ कालविशेषौ स्तवपोषः क्षणः उत्सवः। आबद्धाः माला पंक्तिर्यैस्ते आबद्ध
मालाः। क॰ तां नयनसुभगं दृष्टिप्रियमित्यर्थः। नयनयोः सुभगः नयनसुभगः। तं। अनुकूलवायुगमनेन चातकगर्जितेन
विस्फुरितो सौदामिन्यर्थं समागतं बकपंक्तिदर्शनाच्च भीमतां प्रस्थाने शुभा निमित्तसंपत्तयः। तस्मोऽवश्यं गमनं सफलमेव भविष्य
तीति भावः। बकाः काकादयः वनीमंडले बद्धपंक्तयः संतः सुरतो सवं कुर्वतीति लोकप्रसिद्धिः॥ ॥तामित्ति॥ हे मेघ त्वं तां भ्रातृजा
यां अवश्यं द्रक्ष्यसि विलोकयिष्यसि। भ्रातुः जाया भ्रातृजाया तां। मम पत्नीमित्यर्थः। क॰ तां। दिवसगणनातत्परां। दिवसानां गण
नादिवसगणना। दिवसगणनायां तत्परा दिवसगणनातत्परा। तां। को वेद दिवसावसरो इति तत्परेण अस्मिता सक्ता विरहे। क॰ तां
एकपत्नीं। एकः पतिर्यस्याः सा एकपत्नी तां। पतिव्रतामित्यर्थः। अव्यापन्नां। जीवंतीमित्यर्थः। मद्दागमनाशापाशस्थित
त्वादित्यर्थः। न व्यापन्ना अव्यापन्ना तां। अ॰ आ॰। क॰ त्वं। अविहतगतिः। न विहता अविफलीकृता अविफलीकृता गतिर्ग
मनं यस्य स अविहतगतिः। सफलगमन इत्यर्थः। हि निश्चयेन यस्मात् आशाबंधः आशारूपं बंधनं अंगनानां हृदयं जीवयति।

त्रपवशः श्रीः ईश्वरेण स्थितः । लं प्रतिवध्यातिः । आशापाशः बंधः आशाबंधः । आशानितानितस्य योरितिपादवः । हृदयं जीवितेति
ते रक्षत्साकृतयोरितिशब्दार्थः । क० हृदयं कुसुमसदृशं कुसुमेन सदृशं । कु० । विरहे सति पुष्पवत् म्लानशीलमिति सर्थः ।
कु० हृदयं । विप्रयोगे । वियोगे सद्यः पातिवत् नशीलं । पु० प्रणयि । स्नेहयुक्तमिति सर्थः । प्रणयो स्यास्तीति प्रणयि । मद्दर्शनाशया
जीवंतीं स्त्रीं पावन धीप्रोतीं सतीं अवधिदिवसमापिदिवसान् आगमेवास्वरूपं गंतव्यं पवर हाग्निसंतप्तामपि मम भार्यां संदेशवचनामृतैः
सेवेति भावः ॥ ११ ॥ कर्तुं यच्चेति ॥ हे मेघ नभसि आकाशे राजहंसाः आकैलासात् कैलासपर्वतपर्यंतं भवतः सहायाः संप
त्स्यंते भविष्यंति । राजहंसाः कुतः ते चंचुः चरणैर्लोहितैः सिताः ... आकैलासात् । सहायत्वे सपात्रं स्या
दितिशब्दार्थः । कु० राजहंसाः । तेन वगर्जितं श्रुत्वा मानसोत्सुकाः । मानससरोवर इति ... मानससि सरसि उत्काः
मानसोत्काः । ... गर्जितं ... महीम् ... शिलीन्ध्र ... धात्वर्थ ... कर्तुं प्रभवति सम
र्थो भवति । ... तानि च तानि ... धातोः ... तत्पत्रालाभस्यांसा ... ती
भातवन्ता तां । ... स्यादितिशब्दार्थः । क० गर्जितं । श्रवणसुभगं । श्रवणयोः सुभगं श्रवणसुभ
गं । कर्णसुखावहं । क० राजहंसाः । बिसकिसलयच्छेदपाथेयवंतः । बिसस्य किसलयानि तेषां अग्रभागानि
बिसकिसलयानि । बिसकिसलयानां छेदाः खंडाः बिसकिसलयच्छेदाः तैः पाथेयं पथि भोज्यं । विद्यते ये ५

कांते बिस॰ मृणालं किसलय छेदादि द्रस॰। आकाशे मेघगर्जितं श्रुत्वा कंदलीपुष्पाणि विकसितानि भवंति। अथ च सस्यवती
रपि शिलींध्रपाका भवंति। च पुनः राजहंसाः मानससरोवरं प्रति गच्छंति। एतादृशाः भवंतः सहायकाः भविष्यंतीति भावः। राजहं
साः मानससरोवरं स कुत्र गता इति प्रश्ने तत्राह। हंसा हि मे - वर्षति मानससंसर्गे परिहृत्य महोग्रभयात महेंद्राद्रिदरिद्रस्थल
पर्वते पुरमंते इति लोके प्रसिद्धिः। कंदर्पश्यामयोगे तत्र आपृच्छ्य इति चेत् तत्राह॥ ॥आपृच्छस्वेति। हे मेघ त्वं अमुं शैलं आलिंग्य आलि
गनं कृत्वा प्रियसखं साधु यथा स्यात्तथा आपृच्छस्व यः। कथंभूतं शैलं प्रियसखं। प्रियश्चासौ सखा च प्रियसखस्तं। मित्रं सखा सु
हृदिसमरः। कथंभूतं। तुंगं अत्युन्नतं। कथंभूतं। मेखलासु पर्वतमध्यभूमिषु रघुपदैः श्रीरामचंद्रचरणैरंकितं चिह्नितं। अथ
मेखलाः श्रोणिस्थाने। द्विकटकैः कृत्वा बंधे स्त्रिबंधने या। रघूणां पतिः रघुपतिः। तस्य पदाः रघुपतिपदाः तैः। पुंसां
विहृतमोरकाइत॰। कथंभूतैः पदैः पुंसां पुरुषाणां वंद्यैः। हे मेघ यस्य पर्वतस्य भवतः संयोगं संगमं प्राप्य काले काले वर्षासु वर्षा
सु स्नेहव्यक्तिर्भवतीति भावो भवति। कथंभूता। चिरविरहजं उष्णवाष्पं मुंचतः चिरकालं विरहश्चिरविरहः चिरावि
रहश्चासौ जाते इति चिरविरहजः। तं। बाष्पो नेत्रजलं उष्णो इति विग्रहः। भवता प्रियमित्रेण सह वर्षाभ्यः पर्वतेभ्यः महत्स्नेह
रामचंद्रचरणैरंकितपावनशैलाश्चैव समा नाहि प्रमुदितो ना नेति भावः॥ चेदंशगतानां अन्येषां प्रेमपुरुषा
नानां बाष्पपातो भवति॥ ॥संप्रति मार्गो वक्तव्यमाह। मार्गमिति। हे मेघ तावत् आदौ त्वं सपयालानुरूपं संदीपनमनतो
यं मार्गं प्रस्थानं कथयतः मत्तः त्वं शृणु। तत्र प्रयाणस्य सावधा॰ः। लक्षण काण्णा या। अनुरूपः सपयालानुरूपस्त॥

राम ६

राम कार्गेमणां पदेमासे सौम्यस्त्वे न्वे वले च्च नाम कादवःपदनुमार्गेश्च बलानंतरं हेतुस्तदलं श्रोत्रपेयं कर्णाभ्यामादरेण
श्रवणयोग्यं मेममसंदेशं श्रोष्यसि। पातुं योग्यं पेयं श्रोत्राभ्यां पेयं श्रोत्रपेयं हे मेघ तदलं चिरं नः खेदं श्रान्तः सन् स्याः खविंशु
पर्वतेषु पदं चरणं न्यस्य स्थापयन् गंतासि गमिष्यसि ग्रमसि ततः सन्नू पर्वतशिखरेषु चरणं स्थापयित्वा गंतव्यमसि सर्वथाः।
किं सखा। क्षीणः। निर्वृत्तः सन् श्रोतसां पर्वतनिर्झराणां पतित लघुपयः शुतं सेवया हितं जलं लघुपयो ऽल्पपीत्वा प
रितः लघुपरिगं धुवरितं लघु परिलघु च ततत्पयश्च परिघुं लघुपयः नतः। मानअभसंपर्वताग्रशिखरेषु वि
श्रामं कृत्वा पर्वतनिर्झरं वीक्षमः कमार्गेण मसंदेशं गहीला लघुयागंतव्यमितिभावः॥ गमकेरितिः।
हे मेघ। अतः कारणात् अस्मात् स्थानात् उदङ् मुखः सन् खं आकाशं उत्पत पवनेन सह उड्डीय गच्छ स थ्यौ।
रंगं प्राधान्यसावोन्नेत्य परः। उदीच्यां दिशि मुखं यस्य सः उदङ् मुखः। कस्मात्। चकितचाकितं। भीतभीतं।
पथा स्यात् थामुग्धासिद्धांगनाभिः दृष्टो मसाहः। सिद्धानामंगना। सिद्धांगना। सिद्धांगनाभिर्मुग्धाभिः नाः
स्यात् वसायहृष्यात् दृस। क। मुग्धसिद्धांगनाभिः दृष्टिचिन्तादूत्सा होयस्य सः दृष्टोत्साहः। उत्साहो
निमुखानिचा स्ता ताः उन्मुखः ताभिः। दृष्टः। ऊर्ध्वमुखीभिः। उद्गत ऊर्ध्वंगता
ता। किं स्वित्। इति वितर्के। क। अस्मात् [illegible] पर्वतस्य रङ्गं शिखरं पवनः ६८

राम ६

स्थानात्सरसनिचुलात् सद्य नस्थलवेतसात् इत्यर्थः। सरसाः निचुलाः स्थलवेतसाः यस्मिन् सः सरसनिचुलस्तस्मात्। निचु
लः स्थलवेतसः इत्यमरः। किं कुर्वन् पथि मार्गे दिङ्नागानां स्थूलहस्तावलेपान् अतिपीवरशुंडादंडान् गतगात्रान् परिहरन्
संभावयन् दिशि नागाः दिङ्नागास्तेषां। स्थूलाश्च ते हस्ताश्च स्थूलहस्ताः तेषां अवलेपाः स्थूलहस्तावलेपाः तान्। पी
नीनुसारकपीवरे इत्यमरः। इत्यनेन पत्रभेदे स्यात् कुडुम्भकरयोरपि इति विश्वः। अवलेपस्तु गर्वे स्याल्लेपने दूषणेपि चेति
विश्वः। दिग्गजकरांगताभावप्रशस्तिरयं तं तन्तरामि गच्छ तं तथा अकारो विहरं तं तत्तोस हत्तांन गो वितो कथं सोऽभिनंदती
ति भावः॥ ॥रत्नछायाव्यतिकर इति। हे मेघ इदं ×पुरस्तात्× दृश्यते तव श्यामं वपुः येन धनुःखंडेन अतितरां शोभां त्रायेन कान्तिं
शोभां आपत्स्यते प्राप्स्यते तन्नएतत् आखंडलस्येन्द्रस्य धनुःखंडं पुरस्तात् अग्रे वल्मीकाग्रात् प्रभवति। गात्रं वपुः
संहननं शरीरं वर्ष्म विग्रह इत्यमरः। धनुषः खंडं धनुःखंडं आखंडलः सहस्राक्ष इत्यमरः। धनुश्चापौ धन्वशरासनकोदं
ड कार्मुकं इत्यमरः। वल्मीकस्याग्रं वल्मीकाग्रं तस्मात्। वल्मीकं पुंनपुंसकं इत्यमरः। धनुःखंडं। रत्नछाया व्यति
कर इव प्रेक्ष्यं। अनेकरत्नकांतिसमूहमिव दर्शनीयमित्यर्थः। रत्नानां छाया रत्नछाया तस्याः व्यतिकरः रत्नछाया
व्यतिकरः। रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेपि चेत्यमरः। छाया सूर्यप्रिया कांतिरित्यमरः। कस्य वपुः केनेव। गोपवे
षस्य विष्णोः। वपुः बर्हेणेव मयूरपिच्छेनेव। यथा गोपवेषधारिणो विष्णोः वपुर्बर्हपुच्छेन विराजते तथा तव वपुः
इंद्रधनुःखंडेन विराजते इति भावः। गो स्य। पिच्छं बर्हं नपुंसके इत्यमरः। कथंभूतेन

मे॰टी बर्हेण । स्फुरितरुचिना । स्फुरिता प्रकाशमाना रुचिर्यस्य सः स्फुरितरुचिः तेन ॥ १५ ॥ त्वयीति । हे मेघ त्वं सद्यः सीरोत्कषण
सुरभिक्षेत्रं हलोत्कषसुगंधक्षेत्रं आरुह्य किंचित्पश्चात् लघुः सन् एव उत्तरेण व्रज उत्तरमार्गे लग इत्यर्थः । हलोत्कषक्षेत्रो
परिवर्धं कला उत्तरदिशा मार्गे लग इत्यर्थः । सीरोत्कषणं यत इति सीरोत्कषणं । सुरभितं क्षेत्रं च सुरभिक्षेत्रं । सी
रोत्कषणेन सुरभिक्षेत्रं च सीरोत्कषणसुरभिक्षेत्रं । गोदारणं च सीरोत्थ इत्यमरः । केदारः क्षेत्रमस्य तु इत्यमरः । क्षेत्रं शरीर
केदारे सिद्धस्थानकलित्रयोरिति विश्वः । सुरभिघ्राणतर्पण इत्यमरः । सीरोत्कषणक्षेत्रं । किंविशिष्टं मालं । उन्नतस्थलं ।
उन्नतं स्थलं मालं उन्नतभूतले इत्युत्पलः । कः त्वं । जनपदवधूलोचनैः इति हेतोः पीयमानः । सादरं अवलोक्यमानः । ज
नपदानां वध्वः जनपदवध्वः जनपदवधूनां लोचनानि जनपदवधूलोचनानि तैः । ग्रामीणवनितानयनैरित्यर्थः । इतीति किं । य
तः कृषिफलं त्वयि आयत्तं आधीनं । आधीनो निघ्न आयत्तः इत्यमरः । कः जनपदवधूलोचनैः । भ्रूविकारानभिज्ञैः । भ्रुवो विका
राः भ्रूविकाराः भ्रूविकाराणामनभिज्ञानि भ्रूविकारानभिज्ञानि तैः । अज्ञातभ्रुकुटीविलासैरित्यर्थः । पु॰ जनप॰ । प्रीतिस्नि
ग्धैः । प्रीत्या स्निग्धाः प्रीतिस्निग्धाः तैः स्वाभाविकस्नेहयुक्तैरित्यर्थः । कः त्वं । लघुगतिः । लघ्वी गतिर्यस्य सः । सी
रोत्कषणमिरित्यर्थः । सस्यानां तदधीनतां रुपीव [illegible] मा त्वां [illegible] स्पर्धं प्रतीक्षन्ति । अतस्त्वं न सन्ति ते [illegible] दशा
निहितेनालिप्रवर्षलोलेन [illegible] मार्गे [illegible] सामिति । हे मेघ । आम्रकूटसानुमान् [illegible]
पर्वतः त्वां मार्गश्रीसाधु यथा स्यात् तथा मूर्ध्ना वक्ष्यति प्रापयति ।— — —

आम्रकूटे शृङ्गिष्वरेषु पस्यासः। आम्रकूटः। आम्रश्चूतो रसालो सोऽस्य स॰। कूटोऽस्त्री शिखरं शृङ्गमित्यम॰। सानवो विद्यन्ते यस्मिन्नुक्त
सौ सानुमान्। क॰ तं त्वां। आसारप्रशमितवनोपप्लवं। वनानामुपप्लवः वनोपप्लवः। आसारेण प्रशमितः वनोपप्लवो येन
सः आसारप्रशमितवनोपप्लवस्तं। जलधाराप्रशमितवनोपद्रवमित्यर्थः। धारासंपात आसारः इत्यम॰। क॰ त्वां। अध्व
श्रमपरिगतं। अध्वनः श्रमः अध्वश्रमः तेन परिगतः अध्वश्रमपरिगतः तं। मार्गश्रमेणाभिव्याप्तमित्यर्थः।
तथा हि। क्षुद्रोऽपि क्षुद्रः परको पि पुरुषः प्रथमसुकृतापेक्षया पूर्वोपकारापेक्षया संश्रयाय आश्रयाय मित्रे प्राप्ते सति
विमुखो न भवति पः पुरुषः पुनः उच्चैः उन्नतः सः किं तस्य वार्ता किं वक्तव्या। क्षुद्रो दरिद्रः कृपणे नृशंसे निर्दये त्रिषु इति
पादद्वयः। प्रथमं च तत् सुकृतं च प्रथमसुकृतं तेन स्यादपेक्षा प्रथमसुकृतापेक्षा। तया। आसन्नजलवृष्टिप्रशमितानलोपद्रव
इत्यासपद्रवस्तथा। वह्निर्नोपकारः तेन त्वं आम्रकूटपर्वतेन निवासकुरूप परिचयादातिथ्यं न कुर्वीतेति न शंकनीयं। पु
नः क्षुद्रोऽपि स्विग् हागतेऽपि मित्रे निजोपकारार्थं मित्रे पूज्यपरि यस्य महानुन्नतः सः प्राकृतमित्रं न पूजयेदिति किं
पुनरस्य भाग्यमभिमित्रं प्रपूजयेदिति भावः॥ ॥अध्वश्रान्तं न मिलितः हे जलद आम्रकूटः सानुमान्पर्वतः त्वेन हिरसा
त्वां अवश्यं धारयिष्यति। क॰ त्वां अध्वश्रान्तं अध्वना श्रान्तः अध्वश्रान्तः। तं॰। प्र॰। क॰ त्वां। श्रमपरिगतं श्रमपरि
गतं श्रमेणापरिगतः तं। मार्गश्रमनिवर्तनयोग्यमाप्यायमानमित्यर्थः। हे जलद त्वमपि आसारेण जलधार
पातनस्याम्रकूटपर्वतस्य नैदाघं ग्रैष्मकालोद्भवं दवाग्नितापमपि। निदाघो ग्रैष्मवं नैदाघं। निदाघ उष्णोप
इत्यम॰। तथा हि।

श्री

मे. टी. महत्स्वपूर्वेषु सद्भावार्द्रः इत्यकारः न चिरेण शीघ्रतया फलति। सद्भावेन आर्द्रः सद्भावार्द्रः। तेषु एवं कं॥ ॥छन्नोपान्त इति॥
हे मेघ अचलः आम्रकूटः पर्वतः त्वयि शिखरं आरूढे सति नूनं निश्चयेन अमरमिथुनप्रेक्षणीयां देवदेवीदर्शनी
यां स्वां यास्यति प्राप्स्यति। अमराणां मिथुनानि अमरमिथुनानि। प्रेक्षितुं योग्या प्रेक्षणीया। अमरमिथुनैः प्रेक्ष
णीया अमरमिथुनप्रेक्षणीया तां। स्त्रीपुंसौ मिथुनं द्वंद्वं मिथुनं युग्मं युगलं युग्मं इत्यमरः। अवस्थानेविधा इत्य.। कथं
भूतः अचलः काननाम्रैः छन्नोपान्तः आच्छादितपार्श्वः काननानां आम्राः काननाम्राः तैः। छन्नो आच्छादितो उपा
न्तो पार्श्वौ यस्य सः छन्नोपान्तः। कथंभूतैः काननाम्रैः। परिणतफलद्योतिभिः परिणतानि पक्वानि च तानि फलानि प
रिणतानि परिणतफलानि परिणतफलैः द्योतितुं शीलं येषां ते परिणतफलद्योतिनस्तैः। परिपक्वफलप्रकाशि
भिरित्यर्थः। कथंभूते त्वयि। स्निग्धवेणीसवर्णे। स्निग्धा चासौ वेणी च स्निग्धवेणी स्निग्धवेण्याः समानो वर्णो यस्य सः
स्निग्धवेणीसवर्णः तस्मिन्। स्नेहार्द्रवेणीसदृशस्वरूपे इत्यर्थः। चिक्कणं मसृणं स्निग्धं इत्यमरः। वेणी प्रवेणी शी
र्षण्यशिरस्यौ विशदे कचे इत्य.। कं. अचलः। मध्ये श्यामः। पु. अचलः शेषविस्तारपाण्डुः। शेषश्चासौ विस्तारश्च शेष
विस्तारः शेषविस्तारे पाण्डुः। शेष. अवशिष्टविस्तारे पीत इत्यर्थः। हरिणः पाण्डुरः पाण्डुः इत्य.। इव केन भुवः पृथिव्याः
स्तन इव। यथा कश्चित् कामिनीसुरतान्ते जातश्रमः सन् कामिनीकुचमण्डले शान्तविरहः स्वपिति तथा भवानपि
धरित्र्याः कुचसदृशे आम्रकूटाद्रौ विश्रामं प्राप्स्यतीति भावः॥ ॥स्थित्वेति। हे मेघ तस्मिन् पर्वते मुहूर्तं मुहूर्त
मात्रं स्थित्वा—

त्वं रेवां नर्मदां द्रक्ष्यसि। मुहूर्तमल्पकाले स्थानाद्यादिकाद्भुतये पि च इति शब्दार्थः। रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका इत्यम०।
कः हं। तोयोत्सर्गद्रुततरगतिः [illegible] र्गात् द्रुततरगतिः शीघ्रगतिः नः। तोयस्य उत्सर्गः तस्मात् अतिशयेन द्रुता द्रुततरा गति
यस्य सः। द्रुततरेति गतिः। पु. स्थं। तत्परं आम्रकूटानंतरं वर्त्म मार्गं तीर्णः उद्धृतः। तस्मात् परं तत्परं। अयनं वर्त्म मार्गाध्व
इत्यम०। क. तस्मिन्पर्वते। वनचरवधूभुक्तकुंजे। वनेचराणां वध्वः वन०। वनचरवधूभिः भुक्ताः कुंजा यस्मिन् सः। वने० वधू
भुक्तकुंजाः तस्मिन्। नारी सीमंतिनी वधूः इत्यमरः। निकुंजकुंजौ वा क्लीबे इत्यमरः। क्वापि च। प्राप्स्यांऽगे भक्तिच्छेदैः रचना विशे
षैः x क. रेवां। विंध्यपादे विंध्याचलप्रांते विशीर्णां विस्तीर्णां। विंध्यस्य पादः विंध्यपादः। तस्मिन्। पादाः प्रत्यंतपर्वताः इत्य० x
विरचितां भूतिमिव गजस्यांगे शरीरे भक्तिच्छेदैः। भक्तिच्छेदैः। भक्तिर्नियंत्रलोभो गेरचना भित्तिचित्राद्यालेखः
भूतिर्मार्गे व्यवहारे गजानां लोभसंपदीति विश्वः। क. विंध्यपादे। क. विंध्यपादे। उपलविषमे। उपलैः विषमः। उप०।
तस्मिन्। पाषाणप्रस्तरो ग्रावः पत्थरमानः इत्यमरः। आम्रकूटः पर्वतात् किंचिद्दूरमार्गमतिक्रम्य त्वं प्राप्तः
सन् तां रेवां नर्मदां पाषाणवशैलैरनेकवर्णमिव विलोकय तव महान् कौतुकलाभो भविष्यतीति भावः॥ ॥तस्याः इति (
हे मेघ त्वं तस्याः रेवायाः तोयं आदाय गच्छ ही लागछेः। क. तोयं। वनगजमदैः वासितं। सुगंधितं। वनानां गजाः
वनगजाः। वनगजानां मदाः। वन० तैः। पु. तोयं। जंबूकुंजप्रतिहतरयं। जंबूनां कुंजानि जंबूकुंजानि। कुंजैः प्रति

हतः प्रतिबद्धः यो वस्य ततं अंबूकुञ्जगतिहतस्यं व्रजं कृष्णो जंतु जां नवमित्य। नरसीनुद्यः स्पष्टः इसन। कः नैः वनगडजम
दैः तिक्तैः कषापरसैः। तिक्तोरसे सुगंधोचेलवि-त्वः। कथं भूतं स्तुं वां तेन वृष्टिर्येन सः। प्रवर्षले नाइ की एजिललइसर्थः।
हेघन अनिलः पवनः अंतः सारं त्वांनुजस्यितु उस्याः पितुं न स्पतिवलसमर्थो भविष्यति। अंतः सारो वलेयस्य सः ०अंतः ०।
सारोवत्ते स्थिरो चेस। हीति निश्चये नारेकः सर्वोपि जनः। लघु भवति। च पुनः पूर्णतापरिपूर्णता गौरवायम
वति। पूर्वं कृतनमर्थं दृष्टान्त गजमदगंधैः कषायी भूते रेवाजलं पीयं अंतः सारं त्वां न ज्ञेरयिष्यति। इति भावः॥
॥ नीपमिति। हे मेघ सारंगाः चवगडाः हेमार्गं सूचयिष्यंति। चिह्ने न कथयिष्यंति। सारं गभ्राने के भृंगे कुरंगे
चमतंगजे द्वतविश्वः। पद्मा। सारंगाः मृगाः नेमार्गं सूचयिष्यंति। किं कृत्वा दग्धारण्ये पुद्वान्विदग्धवनेषुअ
नु कच्छं जलं वहुलं स्पष्टं स्यं नं प्रतिऊर्ध्वाः गंधं आघ्राय दग्धानि च नानि अरण्यानि च दग्धारण्यानि
तेषु। अदर्द्वाद्वरूपं [illegible] विपिनं गहनं काननं वनमित्य। कच्छं कच्छमनुद्र इति अनुकच्छं। पथ्या साद्दस्य यो र
वृद्दस। जलक्राय मन्दं पश्यालु सिकच्छस्तथा विधः इसमरः। पुनः किं कृत्वा। अर्द्धरूढ़ै इति। सतैः के
सरैः किंजल्कैः हरितं कपिशं रेणुयामवलं नीपं वल्व संदेह्यार्द्धरूढाः अर्द्धरूढा सैः। किंजल्कः केसरोस्त्र
रोस्त्रियामित्य। हरितं [illegible] पिशंगः। पालाशो हरितो हरित् इत्यम।

रयाव: स्या कृ पिलो धूम्रौघ इस०। नीपो धूलीकदंबो न: सुवासादस्य पुष्प क इस०। नीप: स्यात् कृ हू क: श्रीमान् प्रावृषेण्योह
रिप्रिय इति शब्दार्णव:। पुन: किं कृता। कदली: कंदली: इस०। द्रोणपर्णा शिलींध्र कंदाः कदली भूकदलीति [illegible] नाव।
एवं:। कंदलीवार्णानुसारं भा मो चानुमस्फ न्वो इस०। कं० कंदली: आविर्भूतप्रथममुकुला:। आविर्भूता: प्रथममुकुलाः या
सांता:। आविर्भूत प्रथममुकुला:। कुड्मलो मुकुलो स्त्रियामिस०। कं० स्पष्टे जनितवमुच:। जले स्प ... नां जलके लवा: जले ल
नाकृ मुंचंतीति जलके लवमुकुं नस्प० ... वनेशकलालावइस०। भवति मदर्शनेन यत्र मार्गे कदली कदंबनीपादयो दृष्ट्वा:
नवा मुविकसनशीला: पुष्पिता: भवंति तत्र सभूमिं जिघ्रंतो वनगजा: एतत्सुरभिं भेघा: भवंर्षगत इति सूचयिष्यंतीतिभा
भावं:॥ ॥अंभोबिंदुग्रहणरभसान्निति। हे मेघ सिद्धा: स्तनितसमये तव गर्जितकाले प्रियसहचरीसंभ्रमालिंगितानि। कोताथा ऽ
कुलितानि लिंगितानि। आसाद्य प्राप्य त्वां मानयिष्यंति पूजयिष्यंति। स्तनितस्य समय: स्तनितसमय: तस्मिन्। स्तनितं गर्जितं
मेघनिर्घोष मिस०। प्रियार्थना: सहचर्य: प्रियसहचर्य:। प्रियसहचरीणां संभ्रमा निचतानि आलिंगितानि च प्रियसहचरी
संभ्रमालिंगितानि तानि। संभ्रमो संवेग संभ्रमौ इस०। कं० नानि। सोत्कंपानि। उत्कंपेन सह वर्तमानानि। सोत्कंपानि। सभयत
यासकोचितानीत्यर्थ:। कं० ना: सिद्धा: श्रेणीभूता: पंक्तिभूता:। बलाका बकपंक्ती: परिगणनया निर्दिशंत: हस्तेन दर्शी
यंत: अश्रेण्य: श्रेण्यो भूता: श्रेणीभूता:। यद्वा। अश्रेणय: श्रेणयो भूता: श्रेणीभूता: ता:। श्रेणी खेणां स्त्रियां नयेइस०। बला
का बकपंक्तिरिस०। कं० सिद्धा:। चातकान् वीक्षमाणा:। कं० चातकान्। अंभोबिंदुग्रहणरभसान्। अंभसां बिंदुव: अं
भोबिंदव:। अंभोबिंदूनां ग्रहणं अंभोबिंदुग्रहणं तस्मिन् रभसा चतुरा: अंभोबिंदुग्रहणला...

न्। अंभोलस्तोयपानीयमिस०। —
×२५×

रामः१०

मे·टी पक्षच्छिद्वैदुर्व्यवताः पुमांसो विमुखः स्त्रियः इ.स.·१२ भवत्स्वनुरोमतत्तु इतिमे द्दिनी। आकाशे चालकवलाकृताः कौतुकमालोकयं
तः सिद्धाः स्तनगर्जितमाकर्ण्यपत्रयतमा संभ्रमालिंगनानि मामप्येवं तदुपकारं मा न चिरं बध्नीतीति भावः॥ ॥मार्गे कौतुकं
10 विलोकयन्नालयादिलंबेन कर्तव्यस्तत्राह। उत्पश्यामीति। हे सखे मल्लिपार्श्वदुतं वा [illegible]पिपासोः गंतुमिच्छोः तेन वपर्वते
पर्वते कालक्षेपं उत्पश्यामि विलोकयामि। ममापि यं मल्लिमे मल्लियस्यार्थः मल्लियार्थस्त्वा यान्नुमिच्छति विपासन्ति पिपासत्वी
ति पिपासुस्तस्य पिपासोः। कीदृक् स्य क्षेपः कालक्षेपस्तं। सेपाम्लं वेलिं त्वा वांड इति विवरवः। कः पर्वते। ककुभसुरभौ ककुभैः
सुरभिः ककुभसुरभिस्तस्मिन्। कुटजकुसुमैः सुगंधितके सर्थः। ककुभः कुटजोर्जुन इति शब्दार्णवः। च पुनर्मयो नूक
थमपि आशुरागंतुमलव्येत्र उद्यमं कुर्यात्। तदाहवरमिति शेषः। कः नीमवानूवद्धक्षापांगैर्मयूरैः केकाविनवा
णीः स्वागतीकृत्यप्रत्युद्गतः अग्रे गत्वा गृहीतः। मयूरोनहरगोवहीन्तुक्षापांगः। शिखावलइ यादवः। केकावाणी
मयूरस्य सं·क·नैः शुक्लापांगैः सजलनयनैः। सजलानि सानंदबाष्पाकलितनयनानि येषां तैस्सजलनयनः सोः। मा
र्गे पर्वते प्रचुरकौतुकलालसमानवाहुल्याद्यकौतुकसन्मानलब्धोनलयाविलंबो नावचेयमितिभावः॥ ॥पांडु
च्छायोपवनवृतयः इति। हे मेघ त्वयि आसन्ने सति निकटवर्तिनि सति दशार्णाः देशाः कतिपयदिनस्थायिहंसाः
संपत्स्यंते भविष्यंति। तमेवविनिर्धारणार्थस्तनवगादि[illegible]। कतिपयानि च तानि दिनानि च कतिपय सघ
[illegible] [illegible]। कथंभूताः दशार्णाः। केतकैः केत १०
दिनानि कतिपयदिने ष्वस्थायिनो हंसाः [illegible]

दिन

करहैः पांडुछायोपवनवृत्तयः पांडुरछाया यासां ताः पांडुछायाः पांडुपवनानां वृत्तयः उपवनवृत्तयः पांडुछाया उपवनवृत्तयो येषां
ते पांडुछायोपवनवृत्तयः केतकपुष्पवनकांतिभिः पीतवर्णोद्यानकंटकावरणा इत्यर्थः हरिणः पांडुरः पांडुरः इत्यम॰। अत्र छा
याशब्देन कांतिः। छाया सूर्यप्रिया कांतिरित्यम॰। आरामः स्यादुपवनमित्यम॰। प्राचीनः प्रांतवृतिरित्यम॰। कं केतकैः। सूचिभिन्नैः।
सूचिषु कुसुमाग्रेषु भिन्नैः। विकसिताः सूचिभिन्नास्तैः। केतकीकुसुमाग्रे तु सूचीशब्दः प्रकीर्तितः इति शब्दार्णवः। पुं॰ दशार्णाः।
गृहबलिभुजां काकानां नीडारंभैः कुलायकरणैः। आकुलग्रामचैत्याः आकुलरथ्याः। बलिं भुंजंतीति ते बलिभुजः। गृहस्य
बलिभुजः गृहबलिभुजस्तेषां। गृहं गेहोदवसितं वेश्म सद्म निकेतनमित्यम॰। ध्वांक्षात्मघोषपरभृद्बलिभुग्वायसा अपी
त्यम॰। नीडस्य आरंभाः नीडारंभास्तैः। कुलायो नीडमस्त्रियामित्यम॰। ग्रामस्य चैत्यानि ग्रामचैत्यानि आकुलानि ग्रामचैत्यानि येषां। नवे
वृते आकुलग्रामचैत्याः। समौ संवसथग्रामौ इत्यम॰। चैत्यमायतनं तु चैत्यम॰। चैत्यमायतने बुद्धबिंबे कोद्देशपादपे इति विश्वः।
क॰ दशार्णाः। परिणतफलश्यामजंबूवनांताः। परिणतानि परिपक्वानि फलानि येषु परिणतानि फलानि परिणतफलैः
रम्याः श्यामजंबूवनांता येषु ते परिण॰। जंबूः स्त्री जंबू आववमित्यम॰। त्वयि दशार्णदेशान्निकटवर्तिनि सति केतकश्यामाः पुष्पिता भवि
ष्यंति काकाः कुलायं करिष्यंति जंबूवृक्षाः फलिता भविष्यंति राजहंसाः कतिपयदिनानि स्थायिनः स्थास्यंति एते नानुमा
नात्मकेन भविष्यंति तेषां दशार्णानां राजधानीं गत्वा सद्यः सत्कालं वेत्रवत्याः
स्य धर्मास्तत्र भविष्यंतीति भावः॥ ॥तेषामिति। हे मेघ त्वं तेषां दशार्णानां राजधानीं प्रथितविदिशालक्षणां इति शब्दार्णवः। कृ॰ तो राजधानीं। दृश्य
पयः सुखमिव अधरमिव पास्यसि। प्रधान(?) राजधानीति कथ्यते

दिशासु प्रथितविदिशालक्षणां विदिशापाः नगर्याः लक्षणं विदिशालक्षणं प्राथितं प्रसिद्धं विदिशा इति लक्षणं नामधेयं यस्याः सा
प्रथितविदिशा तस्यां। किं कृत्वा। कामुकत्वस्य अविकलं संपूर्णं फलं लब्ध्वा कामिनः संपूर्णं फलं लब्ध्वेत्यर्थः। कामुकस्य भावः कामुक
त्वं तस्य कामुकत्वस्य। कं पयः। तीरोपान्तस्तनितसुभगं तीरस्य उपान्तः तीरोपान्तः तीरोपान्ते स्तनितं तीरोपान्तस्तनितं
तेन सुभगं तीरोपान्तस्तनितसुभगं। कामिनः पक्षे रतिकूजितोपेतमाहोयः। पुं पयः। चलं तरलं स्वादु अतिरुचनीयं रसमित्यर्थः। पुं पयः।
सभ्रूभंगं भ्रूभंगाः भ्रूभंगाः भ्रूभंगैः सह वर्तमानं सभ्रूभंगं भंगा भ्रुकुटीविलासस्तद्वत् तरंगैर्युक्तमित्यर्थः। भंगस्तरंगः भ्रुविवा
इव। कामिनः पक्षे भ्रुकुटीविलासयुक्तमित्यर्थः। पुं पयः। चलोर्मि। चलाः ऊर्मयो यस्मिन् तत्। चलोर्मि। कामिनः पक्षे च चलाः एव
ऊर्मिस्थानीयेत्यर्थः॥ विदिशानगर्यंतके वेत्रवतीपयः कौताधरमिव निपीय संपूर्णं संभोगसुखं प्राप्स्यसीति भावः॥ २४॥ अहं के
वसामी खोंकाया माह। नीचैरिति। हे मेघ त्वं तत्र विदिशां नगरीसमीपे विश्रामहेतो नीचैराख्यं गिरिं पर्वतं अधिवसेः वा संकु
र्याः। विश्रामस्य हेतुः विश्रामहेतुस्तस्य। नीचैः इति आख्या यस्य सः नीचैराख्यस्तं। आख्या हि अभिधानं चेत्यमरः। किं भूतं गिरिं
संपर्कात् त्वत्संयोगात् प्रौढपुष्पैः कदंबैः पुलकितमिव संजाततरोमांचमिव। तेन संपर्कः तत्संपर्कस्तस्मात्। प्रौढानि पुष्पाणि
येषां ते प्रौढपुष्पास्तैः। प्रवृद्धकुसुमैरित्यर्थः। हे मेघ यः नीचैराख्यः पर्वतः शिलावेश्मभिः सह शिलामंदिरैः नागराणां
पुरवासिनां उद्दामानि यौवनानि प्रथयति प्रकटयति। शिलाः वेश्मानि शिलावेश्मानि तैः। कं शिला
वेश्मभिः। पण्यस्त्रीरतिपरिमलोद्गारिभिः। पण्याश्च ताः स्त्रियश्च पण्यस्त्रियः पण्यस्त्रीणां रतिः पण्यस्त्रीरतिः पण्यस्त्री
रतेः परिमलः पण्यस्त्रीरतिपरिमलः पण्यस्त्रीरतिपरिमलं उद्गिरंतीति शीलं येषां ते पण्यस्त्रीरतिपरिमलोद्गारिणस्तैः॥
एवं कृता गतः इति प्रकाशार्थः॥

रा
१

वेश्यासुरतपरिमलसुगंधवासितैः इत्यर्थः। वारस्त्री गणिका वेश्या पण्यस्त्री रूपजीविनी इत्यमरः। विमर्दोत्थे परिमलो गंधे
जनमनोहरे स्मृतः॥ वेश्यासुरतोद्भासितकंदरारूपे मंदिरे नीचाख्यपर्वते निवासं विधाय कृतविश्रामो गच्छेति भावना॥ ॥ विश्रां
तइति। हे मेघ संतत्र नीचाख्यपर्वते विश्रांतः सन् वनगनदीतीरजातानि उद्यानानां यूथिकाजालकानि यूथिकाकुड्मलानि न
वजलकणैः सिंचन्सन् व्रजगच्छ। वनगानां नगः वनगवः नगनदीनां तीराणि नगनदीतीराणि नगनदीतीरेजातानि गन
नदीतीरजातानि तानि। यूथिकानां जालकानि यूथिकाजालकानि तानि। गणिका यूथिकांबष्टा इत्यमरः। कोरिकं जालक
लिका कुड्मल मुकुलो स्त्रियाम् इति हेमा बुधः। नवानि च तानि जलानि नवजलानि नवजलानां कणाः नवजलकणास्तैः। क
णस्तुं। पुष्पलावीमुखानां पुष्पचये दत्तनखरक्षतां स्त्रियाणां वदनानां छायादानात् क्षणपरिचितः पुष्पाणि लुनंति छिंदं
ति ताः पुष्पलाव्यः पुष्पलावीनां मुखानि पुष्पलावीमुखानि तासां पुष्प। छायायाः दानं छायादानं तस्मात्। क्षणं परि
चितः क्षणपरिचितः। कं। पुष्पलावीमुखानां गंडस्वेदापनयनरुजा क्लांतकर्णोत्पलानां। गंडौ कपोलौ स्वेदः गंडस्वेदः तस्या
पनयनं गंडस्वेदापनयनं गंडस्वेदापनयनेन रुक् गंडस्वेदापनयनरुक् तया गंड। गंडौ कपोलौ इत्यमरः। घर्मो निदाघः स्वे
दः स्यादिति। कर्णयोः उत्पलानि कर्णोत्पलानि क्लांतानि कर्णोत्पलानि येषां तानि क्लांतकर्णोत्पलानि तेषां। मार्गे संग
तानि नानापुष्पाणि स्वकीयकरैः संचयन् वपुनः लूनपुष्पाणां स्त्रीणां मुखानि छायया सुखयन् व्रजेति भावः। अत्रो
कदेशस्थोपचारात्॥ यथाहि। कश्चित्कामी त्रियं अधरपानेनाश्वासयन् तथा वा न्योपि

मे • टी कुभूतपुष्पां स्त्रियं संगम्यतामविच्छिन्नां संस्पृष्टवत्स इव समीपं गच्छति। तथापि लंघनमतिच्छिन्नितार्थः॥ ॥वक्र इति। हे मेघ उत्त
राशां उत्तरदिशां प्रस्थितस्य चलितस्य भवतः यद्यपि वक्रः। विषमः पंथा मार्गो भवति तथापि उज्जयिन्याः सौधोत्संगप्रणयापवि
मुखः मास्म भूः। उज्जयिन्या सौधा आराः तां उज्जयिनीं गच्छ। विना तां उज्जयिनी समेत्य। सौधानां उत्संगाः सौधोत्संगाः।
तेषु प्रणयः सौधोत्संगप्रणयः तस्मात् विमुखः सौधोत्संगप्रणयविमुखः। सौधो राजसदनमित्यर्थः। उत्संगः उपरिभा
गः। प्रणयः स्नेहः स्मा सारिव पेषा पौंचा सौहृदे चिन्ह इत्यमरः। हे मेघ तत्र तस्यां उज्जयिन्यां पौरांगनानां स्त्रीणां लोचनैः यदि त्वं न
रमसे तर्हि विधात्रा त्वं वंचितः असि गव धात्रेण तोषः। पुरे भवाः पौराः पौराश्च ता अंगनाश्च पौरांगनास्ताः। क• लोचनैः विद्युद्दामस्फुरि
तचकितैः विद्युद्दाम्ना। तथा विद्युद्दामा निविद्युद्दाम्नोस्फुरितं विद्युद्दामस्फुरितं। विद्युद्दाम्नो स्फुरणात् x म स्फुरितेन चकितानि विद्युद्दा
मस्फुरितचकितानि तैः। तडित्सौदामिनि विद्युदित्य•। क• लोचनैः लोलापांगैः लोला चपला अपांगा नेत्रप्रान्ता येषां तानि लोलापांगानि तैः। अ
पांगौ नेत्रयोरंते इत्यम•। यद्यपि नीचैः पर्वतात् आवंती गंतुं वक्रमार्गोस्ति तथापि तत्र गन्तव्यं न चेत् विभ्रमावलोकनात् नयनय
नसफलं ताभ विष्यति तस्मात् दिग्वैपरीत्येपि तत्र गंतव्यमिति भावः॥ ॥वीचिक्षोभ इति। हे मेघ त्वं पथि मार्गे निर्विंध्यायाः नद्याः
रसाभ्यंतरं रसं जलमभ्यंतरं संनिपत्य संयोगं कुरु साभवानिर्विंध्या नदी मध्ये भव संगथे सर्थः। सेर स्पर्शं भ्यंतरं सं रसाभ्यंतरं
पद्मा सौम्ये जलं अभ्यंतरे यस्य सः रसाभ्यंतरः इति पाठः। क• निर्विंध्यायाः विक्षोभ स्तनितविहगश्रेणिकांचीगुणायाः वीचौ
नांक्षोभः वीचीक्षुः तेन स्तनिता शब्दायमाना विहगाः वीचिक्षोभस्तनितविहगाः तेषां श्रेणि वीचिक्षोभस्तनितविहगश्रेणिः
वीचिक्षोभस्तनितविहगश्रेणिरेव कांचीगुणो यस्याः सा वीचिक्षोभस्तनितविहगस्तनितविहगश्रेणिकांचीगुणाः त 5
स्याः

स्याः तरंगविक्षोभक्षुभितखगपंक्तिरेव दृश्यंटिके सर्थः । भंगस्तरंगऊर्म्मिर्वा स्त्रियां वीचिरथोर्म्मिषु इत्यमरः । खगे विहंगविहग इत्यमरः । अलोरे रसनातु
राजयः इत्यमरः । स्त्रीकट्यां मेखला कांची सप्तकी रशना तथा स्त्रियामित्यमरः । पु. निर्विंध्यायाः । स्खलितसुभगं संवदत्सुंदरे यथा स्यात्तथा से सर्पं
स्याः गच्छ स्याः स्खलितेन सुभगं स्खलितसुभगं । पु. निर्विंध्यायाः स्खलितसुभगं दर्शितावर्तनाभेः आवर्त एव नाभिः आवर्त
नाभिः दर्शिताआवर्तनाभिर्यस्याः सा । हीपुंस्कोपमर्थः । स्त्रीणां प्रियेषु विभ्रमः । विन्यासः आद्यप्रथमप्रणयवचनं एवम
वलिप्रथमं स्त्रीणां प्रेमवचनं विन्यासरूपे सर्थः । आद्येभवं आद्यं प्रणयस्नेहवचने प्रणयवचनं । यथा कांचिन्नायिका विभ्रमे
णैव स्वाभिप्रायं निवेदयत्येवं इयं च निर्विंध्या नाम नदी इत्येव विलासान्प्रकटयंतीत्यनया विलोकनीया इति भावः ॥
वेणीभूतेति । हे सुभग हे मेघ येन त्वया विधिना सा सिंधुः निर्विंध्या नाम नदी कार्श्यं कृशतां त्यजति स विधिः त्वया एव उपपाद्यः कर्त्तव्यः देवीनद
विरहे च द्यो सिंधुर्नासकृति स्त्रियामित्यमरः । कः सिंधुः । विरहावस्थया तेन त्वया सौभाग्यं व्यंजयंती प्रकाशयंती । विरहस्याऽवस्था विर
हावस्था तया । पु. सिंधुः । वेणीभूतप्रतनुसलिला अवेणी वेणीभूता वेणीभूतं । प्रतनु सलिलं यस्याः सा वेणीभूतप्रतनुसलिला समज
लधारे सर्थः । पु. सिंधुः जीर्णपर्णैः जीर्णपत्रैः पांडुच्छाया पांडुकांतिः । जीर्णानि च तानि पर्णानि जीर्णपर्णानि तैः । पत्रं पलाशं
छदनं दलं पर्णं छदः पुमानित्यमरः । कः जीर्णपर्णैः । तटरुहतरुभ्रंशिभिः । तटे रुहंति ते × × तटरुहाश्च ते तरवश्च त
टरुहतरवः । तटरुहतरुभ्यः भ्रंशितुं शीलं येषां तानि तटरुहतरुभ्रंशीनि तैः । तटे सन्नत्र त्वप्तति तेति सर्थः । क. तानि निर्विंध्या
अतीतस्य उल्लंघितस्य । यथा कांचिद्विरहि[illegible]नारी सा विरहापांडुवर्णा कृशा च भवति पश्चात्

रा म १३

मे० टी विरहगतं प्राप्तिं संगमस्य संभोगं च कृत्वा विरहस्य वं च मीअवस्थां केरा मांडैसे जितथा नदी अपि वेणीभूतसूक्ष्मसलिला तटपति
तैः पांडुपत्रैः पांडुवर्णा तथाऽत्यन्तलला कृशता तां प्राकाश्य का दर्शी नदीयं वर्णि ले नव दृष्पे तिभावः॥ ॥प्राप्यावन्ती॥ हे मेघ त्वं उदयनक
13 थाकोविदग्रामवृद्धान् देशान् प्राप्य पूर्वोदिष्टां पूर्वकथितां विशालां अवंतीपुरीं अनुसर व्रज। उदयनस्य उदयननाम्नः राज्ञः कथा
उदयनकथा तस्यां कोविदा उदयनकथाकोविदाः ग्रामेषु वृद्धाः ग्रामवृद्धाः उदयनकथाकोविदाः ग्रामवृद्धा येषु ते उदयनक
थाकोविदग्रामवृद्धास्तान्। पूर्वं उद्दिष्टां तां। कः अवंतीं श्रीविशालां। श्रिया विशाला। कः इव। यस्यां सा। श्री विशाला तां। श्रीवि
शालां कां। शोभासंपत्तिबहुलामित्यर्थः। शोभासंपत्तिप्रधानां पुलस्त्यश्रीमत्वादस्याः इति शाश्वतः। कः अवंतीं। विशालां कोदृ
शीं। यथा। विशालाख्या प्रसिद्धा नामतः। किंमिव स्वर्गिणां देवानां दिवः स्वर्गस्य खंडमिव। शाकलमिव गों विच
तैः येषां ते स्वर्गिणस्तेषां। निजं शकलखंडे वाहरम्। कः खंडं येषु तैः हृतं आनीतं। कः स्वर्गिणां सुचरितफले पुण्यफ
ले स्वल्पीभूते सति गां पृथ्वीं गतानां [illegible] णां सुचरितस्य फलं सुचरितफलं तस्मिन्। अस्वल्पः स्वल्पो भूतः स्वल्पीभूतः
तस्मिन् स्वल्पीभूते। शेषैः पुण्यैः कुं भिन्नीत्समादृसः। कः खंडं। कांतिमत्। कांतिरस्यास्तीति कांतिमत्। उदयना इत्यत्र
पसंवादितां संभोगादपि विशिष्टभोग्यां उज्जयिनीं प्रति गमनं हि यानस्याऽपि इति भावः॥ ॥दीर्घीकुर्वन्निति॥
हे मेघ यत्र यस्यां उज्जयिन्यां शिप्रावातः स्त्रीणां सुरतग्लानिं हरति। शिप्रायाः वातः शिप्रावातः। कः शिप्रावातः। प्रस्
फुटुप्रभाते स्फुटितकमलामोदमैत्री [illegible] गंध इत्यमरः। आमोदः सोतिनिर्हारिद् [illegible]
त्यमरः। गंधद्रव्ये वपायोस्त्री निर्यासे सौरभेऽपि इति यादवः। १३

स्फुटितानि च तानि च तानि कमलानि च स्फुटितकमलानि तेषां । आमोदः स्फुटितकमलामोदः स्फुटितकमलामोदस्य मैत्री स्फुटितकमल
लामोदमैत्री स्फुटितकमलामोदमैत्र्या कषायः सुगंधो यस्मिन्स तः । किं कुर्वन् सन् । सारसानां पक्षिणां कूजितं शब्दं दीर्घं कुर्वन् सन् ।
सारसो मैथुनी कामी गोनर्दः पुष्कराह्वयः इति यादवः । पक्षिणः सारसानां हंसानां कूजितं दीर्घं कुर्वन् । चक्रांगः सारसो हंसः
इति शाश्वतः एव । कः । सारसानां कूजितं । पटुमदकलं । पटुः श्रव्यो मदप्रयुक्तः पटुमदः पटुमदेन कलं पटुमदकलं । प्रवील मदकर्णभीदव
स्यर्थः । कलो मंद्रस्तु गंभीरे स० । क० । शिप्रावातः । अंगानुकूलः । अंगेष्वनुकूलः अंगानुकूलः । सर्वांगसुखद इत्यर्थः । क इव प्रा
र्थनाचाटुकारः । प्रार्थनायां विलम्बित प्रियतम इव प्रार्थनया चाटूक्तिं करोतीति प्रार्थनाचाटुकारः । चटु चाटु प्रियवाक्ये इति
विश्वः । अत्र शिप्रावातेन नायकेनोपमानं । यथा कश्चिन्नायकः सर्वर्तुतापरतः सुरतसंभवेकमलामोदं गंधयुक्तः स्त्री उप
हंगानुकूलः पश्चात्कामगतस्य सुरतात्पश्चात्कथितैः प्रेमवचनैः कांताकोपमपनीय गाढालिंगनचुंबनगात्रसंवाहन
प्रधानं संभोगं करोति । कांतां च प्रियचाटुकृतिभिः विस्मृतपूर्वखेदां प्रार्थनां सफलयतीति भावः । अनेन खंडितालक्ष
चितं ॥ २५ ॥ हारांस्तारानिति । हे मेघ यत्र यस्यामुज्जयिन्यां कोटिशः अनेकशः विपणिरचितान् तारान् हारान् मौक्तिकान् च पुनः तर
लगुलिकान् हारगतमध्यमणीन् च पुनः शंखशुक्तीः च पुनः मरकतमणीन् च विद्रुमाणां च भंगान् दृष्ट्वा सलिलनिध
यः समुद्राः तोयमात्रावशेषाः संलक्ष्यंते । विपणिरचिताः विपणिषु रचिता न्यस्ताः । आपणस्तु निषद्यायां विपणिः पण्यवीथिका
इत्यमरः । तारो मुक्तादिसंशुद्धौ तरलो हारमध्यगः ... नैर्मल्यं तरलगुटिकाश्च तरलगुटिका सार । मध्यमणि

मे॰टी न महारत्नानीत्यर्थः। तरलो हारमध्यगः इत्यमरः। पिण्डे मस्तौ महारत्ने गुटिका वङ्गपारनदीति शब्दार्णवः। शंखाश्च शुक्तयश्च शंखशुक्तयस्ताः।
शंखशुक्तीः। मुक्तास्फोटः स्त्रियां शुक्तिः शंखः स्यात्कम्बुरस्त्रियामित्यमरः। शंखोऽस्ति ध्वनिर्लोके गाढास्थीस॰। मरकताश्च ताः मणयश्च मर
कतमणयस्तान्। गारुत्मतं मरकतमश्मगर्भो हरिन्मणिरित्यमरः। विद्रुमाणां प्रवालानां। विद्रुमः पुंसि प्रवालं पुंनपुंसकमित्यमरः। सलिलेनानां
निधयः सलिलनिधयः। तोयमात्रं अवशेषं येषां ते तोयमात्रावशेषाः। कं॰ मरकतमणीन् उन्मयूखप्ररोहान्। मयूखस्य प्ररोहाः
मयूखप्ररोहाः उद्गताः मयूखप्ररोहाः येषां ते उन्मयूखप्ररोहास्तान्। प्रकरेण शष्पं बालतृणं घासमित्यमरः। पुं॰ मरकतमणीन् शष्पश्यामान्।
शष्पं बालतृणं तद्वत् श्यामाः शष्पश्यामाः। दृष्ट्वा बालकेन तं स्थितस्य हृष्टः। उज्जयिन्यां रत्नाकरा राशयो परिलसं सम्पाद्य यान्ति
रत्नानि इति भावः॥ ॥प्रद्योतस्येति॥ हे मेघ यत्र यस्यां उज्जयिन्यां अभिज्ञः पुराकथाभिज्ञः चतुरः जनः आगन्तून् देशान्तरादागतान्
बन्धून् इति अमुना प्रकारेण परिरम्भयति उत्फुल्लान् करोतीति किं अत्र अस्यां उज्जयिन्यां प्रद्योतस्य प्रद्योतनाम्नः राज्ञः प्रियदुहितरं कं
न्यां वत्सराजः जह्रे हृतवान्। पुनः अत्र अस्यां उज्जयिन्यां तस्यैव प्रद्योतस्य हैमं सौवर्णं तालद्रुमवनं अभूत्। हे मेघ। इदं हैमं
तालानां द्रुमाः तालद्रुमाः तेषां तालानां वनं तालवनं। पुं॰ अत्र अस्यां उज्जयिन्यां नलगिरिः प्रद्योतकुञ्जरः दर्पात् गर्वात् स्तम्भं व
उत्पाट्य उद्भ्रान्तः उन्मत्तो जातः। अत्रोज्जयिन्यां वत्सराजः कश्चित् राजा प्रद्योतनाम्नः राज्ञः कन्यां स्वयं हृतवान् अपि
नातप्रवान् सदाशिवप्रसादात् स्वर्णमयं तालवृक्षवनं अभूत्। तथा सति प्रद्योतपुत्रो नलगिरिः इन्द्रदत्तः उद्भ्रान्तो दिग्दाहे लक्ष
वप्रसादान्मत्तो जातः। इति अवन्तीमाहात्म्ये वत्सराजकथा॥ ॥अपि च। हे जलधर अस्मिन् काले

विरहितासंदेशप्रस्तावे महाकालं आसाद्य महाकालनाम्नो रुद्रस्य स्थानं प्राप्य यावत्तेन यनविषयं भानुः अभ्येति प्राप्नोति तावत्ता
पास्थातव्यं। वपुनः हे आमंद्राणां गर्जितानां फलं अविकलं निराकुलं यथा स्यात्तथा लप्स्यसे प्राप्स्यसि। आ ह मंतात् मंद्राः आमंद्रास्ते
षां। कालो मंद्रस्तु गंभीरे इस०। कें कुर्वन्। शूलिनः रुद्रस्य संध्याबलिपटलहस्तां कुर्वन्। संध्यायां बलिः संध्याबलिः। संध्याबलेः पटहः
संध्याबलिपटहस्तेषां भावः संध्याबलिपटहता तां। सायं संध्या पितृप्रसूरिस०। करोपहारयोः पुंसि बलिः। प्राण्यंगजे स्त्रियां
आनकः पटहो ढक्का भेरी स्त्री दुंदुभिः पुमान् इस०। कं संध्याबलिपटहतां। श्लाघनीयां। श्लाघि तु योग्याः श्लाघनीया
तां श्लाघनीयां तां। महाकालरुद्रसमीपे गर्जितस्य ते संध्यानीराजने दुंदुभीनां फलमविकलं भावि इत्यनीतिभावः॥ ॥पादे
न्यासेति। हे मेघ तत्र तस्मिन् महाकालस्थाने वेश्याः त्वयि कटाक्षान्मोक्ष्यंते। वारस्त्री गणिका वेश्या रूपाजीवा च सा जनैः इस०।
कटाक्षोपागदर्शने इत्यमरः। किं कृत्वा। त्वत्तः वर्षाग्रविंदून् प्रथमजलशीकरान् प्राप्य। अग्रा अभवते विंदवः अग्रविंदवः।
वर्षाणां अग्रविंदवः वर्षाग्रविंदवस्तान्। पृषंति विंदुपृषताः इस०। कं०। कटाक्षान्। मधुकरश्रेणिवंधान्। भ्रमरपंक्ति
वत् नीलान् इस०। मधुकराणां श्रेणयः मधुकरश्रेणयः मधुकरश्रेणिवत् दं धो ये पांते मधुकरश्रेणिवंधास्तान्।
मधुकृतो मधुकरो मधुपालिर्मधुपालिन इस०। कं। वर्षाग्रविंदून्। नखपदसुखान् नखक्षतसुखान् हानि स०। नखा
नां पदाः अंकाः नखपदाः नखपदेषु सुखाः नखपदसुखास्तान्। कं० वेश्याः पादन्यासक्वणितरशनाः पादन्या
सः पादन्यासः पादन्यासेन क्वणिता शब्दायमाना रशना यासां ताः पादन्यासक्वणितरशनाः। पदध्रिश्चरणो स्त्रियां इस०।

मे॰टी॰ काञ्चीसम्पर्कीरत्नाद्यिपदइत्य॰। क॰ वैश्याः चामरैः क्लान्तहस्ताः। चामरं तु प्रकीर्णकं इत्य॰। क्लान्ताः श्रमिताः हस्ता यासां
ताः। क॰ चञ्चत्कोणावधूतैः। मंदं दोलितैरित्यर्थः। कोणत्र्यायावधूतानि कोणावधूतानि तैः। क॰ चामरैः। रत्नच्छायाखचितव
15 लिभिः। रत्नानां छाया रत्नच्छाया तया खचिता वलयः पश्वासरदंडा येषां तानि रत्नच्छायाखचितवलीनि तैः। रत्नकां
तिविराचितदंडैरित्यर्थः। रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेपि चेत्य॰। छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातप॰। वलिश्चामरदंडेच
जराविरले चर्मणि त्रिषु इति विश्वः। महाकालस्य रुद्रस्य निकटे गमनेन महाकालदर्शनं देव्याः विभ्रमकटाक्षदर्शनं च लाभ
द्वयं भविष्यतीति भावः॥ ॥ॐ जालोद्गीर्णैरिति॥ ॥भर्तुरिति॥ ॥हे मेघ त्वं अस्याः अवंत्याः हर्म्येषु खेदं नीत्वा चंडीश्वर
रस्य रुद्रस्य धाम स्थानं यायाः। ×पुण्यं× [illegible] चंडीश्वरः चंडीश्वर इत्य॰। क॰ त्वं केशसंस्कारधूपैः केशसंस्कारधूपैः। ।
वेलीसंस्कारार्थं विरचितधूपैरित्यर्थः। उपचितं वर्धितं वपुः यस्य सः उपचितवपुः। क॰ तैः केशसंस्कारधूपैः।
जालोद्गीर्णैः जालेभ्यः उद्गीर्णाः जालोद्गीर्णास्तैः। जालं समूह आनायगवाक्षक्षारकावपिइत्य॰। क॰ त्वं। भवनशि
खिभिः गृहमयूरैः बंधुप्रीत्या दत्तनृत्योपहारः। भवनस्य शिखिनः भवनशिखिनः तैः। भवनं नागारमंदिरमित्य॰। शिख
वलः शिखी केकी सम॰। बंधुवत्प्रीतिः बंधुप्रीतिस्तया बंधुप्रीत्या। दत्तं नृत्यमेव उपहारो येन सः दत्तनृत्योपहारः। [illegible]
उपायनमुपग्राह्यमुपहारस्तथोपदेत्यमरः। क॰ हर्म्येषु। कुसुमसुरभिषु। कुसुमैः सुरभीणि कुसुमसुरभीणि तेषु।
सुरभिर्घ्राणतर्पणः इत्यम॰। पु॰ हर्म्येषु। ललितवनितापादरागांकितेषु। सुंदरस्त्रीचरणयावकचिह्नितेष्वित्यर्थः ११५

ललिताश्च ताः वनिताश्च ललितवनिताः ललितवनितानां पादाः ललितवनितापादाः तेषां रागाः ललितवनितापादरागाः तैः अं
किताः ललितवनितापादरागांकितास्तेषु । क॰ स्त्री॰ इति हेतोः गणैः रुद्रपार्षदैः सादरं वीक्ष्यमाणः । इति किं । अयं मेघः मनुः शिवस्य कंठ
छविः । पु॰ स्त्री॰ अध्वखिन्नांतरात्मा । अध्वना खिन्नः अंतरात्मा यस्य सः । पु॰ स्त्री॰ चंडीश्वरस्य धाम पुण्यं पवित्रं । क॰ तं चंडीश्वर
स्य धाम । मरुद्भिः पवनैः धूतोद्यानं धूतानि कंपितानि उद्यानानि पुष्पस्य नतः । धूतोद्यानं । क॰ मरुद्भिः । गंधवत्याः नद्याः
कुवलयरजोगंधिभिः । कुवलयानां रजः कुवलयरजः कुवलयरजोरभिः गंधो विद्यते येषु कुवलयरजोगंधिनः तैः ।
कमलवत् सगंधसुगंधयुक्तैरित्यर्थः । क॰ मरुद्भिः तोयक्रीडानिरतयुवतिस्नानतिक्तैः । तोयस्य क्रीडा तोयक्रीडा । तस्यां
निरताश्च ताः युवतयश्च तोयक्रीडानिरतयः तासां स्नानं तोयक्रीडानिरतयुवतीस्नानं तेन । स्नानेन तिक्ताः तोय॰ तैः ।
तैर्लौक्यनायकस्येत्यर्थः । × क्रीडारवेणाच कुंदनमिश्रः । कटुतिक्तकषायास्तु सौरभ्येपि प्रकीर्तिता इति हलायु
धः । क॰ चंडीश्वरस्य । त्रिभुवनगुरोः । × त्रिभुवनेषु गुरुः × स × त्रिभुवनगुरुस्तस्य । अवंतीहर्म्यविलोकनार्द्र कौरासंक्रा
रपुष्पवपुस्तंभमयरत्नानिसोपहारः कामिनीदर्शनानंगतः गतोऽध्वश्रमः गणैः सादरमवलोकितः त्रिविधपवनेन नाशित
शरीरखेदः महाकालरुद्रमंदिरं गच्छेति भावः । इति युग्मं ॥ ॥ पश्चादिति । हे मेघ त्वं पश्चात् संध्यापूजानंतरं पशुपतेः
नृत्यारंभे आर्द्रनागाजिनेच्छां आर्द्रगज [illegible] नां पतेः पशुपतेः तस्य प॰ । नृत्यस्यारंभः

नृत्तारंभे तस्मिन्नृत्यस्यारंभे नर्तने इत्यर्थः। नागस्याजिनं नागाजिनं। आर्द्रं च तत् नागाजिनं चार्द्रनागाजिनं तस्य इच्छा आर्द्र
नागाजिनेच्छा तां। मतंगजो गजो नागः कुंजरो वारणः करी इत्यमरः। अजिनं चर्म कृत्तिस्त्री इत्यमरः। कोलितार्द्रगजचर्मस्यापनेच्छामेव भवेय
र्थः। कः। स्त्वं। मंडलेन मंडलाकारेण यथा भुजतरुवनं अभिलीनः व्याप्तः। भुजा एव तरवः भुजतरवः भुजतरूणां वनं भुजतरुवनं। के-
स्त्वं। सांध्यं तेजः दधानः। कः। तेजः विकसितजपापुष्परक्तं। विकसिता चासौ जपा च विकसितजपा विकसितजपायाः पु-
ष्पं विकसितजपापुष्पं विकसितजपापुष्पवत् रक्तं विकसितजपापुष्परक्तं। अद्र पुष्पं जपावज्जपुष्पं तिःकस्य पु-
दे दिस्य। कः। स्त्वं। भवान्याः शान्तोद्वेगस्तिमितनयनं निरस्तगजचर्मभयचलिताले नेत्रं यथा स्यात्तथा दृष्टभक्तिः। शान्तः उद्वे-
गो ययोः ते शान्तोद्वेगे शान्तोद्वेगे स्तिमिते नयने यस्मिन् कर्मणि तत् शान्तोद्वेगस्तिमितनयनं। दृष्टा भक्तिर्यस्य सः दृष्टभक्तिः।
स्तिवद्नृत्तारंभे जपाकुसुमारुणो भवान् पार्वत्या निर्भयं नेत्रे नेत्रे दृष्टस्त्वं तत्र हस्ते च मे छायानिवर्तयेति भावः। सदाशिवःशो-
रिताई गजेन्द्राजिनमुद्यो क्षिप्य तदधोवस्तीति प्रसिद्धिः॥ ॥गच्छन्तीनामिति। हे मेघ त्वं तत्र नगर्यां उज्जयिन्यां नरप-
तिपथे राजमार्गे रमणवसतिं गच्छन्तीनां योषितां नक्तं रात्रौ सौदामिन्या उर्वीं दर्शय। नरपतीनां पथाः नरप-
थः तस्मिन्। रमणस्य वसतिः रमणवसतिः तां रमणवसतिं। कथं। नरपतिपथे। सूचिभेद्यैः अतिघनैः तमोभिः अंध-
कारैः रुद्धालोके गतिरहितप्रकाशे इत्यर्थः। सूचिभिः भेद्यानि सूचीभेद्यानि तैः। अंधकारोस्त्रि ×स× यां ध्वान्तं तमिस्रं
तिमिरं तमश्च इति। कथं। सौदामिन्याः। कनकनिकषस्निग्धया स्निग्धपाषाणकृतसुवर्णरेखापीतयेत्यर्थः। कनक सक

स्फलिकष्वः कनककनिकः। कनककनिकषच्छस्निग्धा। कनककनिषस्निग्धा। तया। मेघ त्वं तोयोत्सर्गस्तनितमुखरः मा स्म भूः।
च पुनः ताः क्लिष्टाः विक्लवाः व्याकुलाः मा भवन्तु। ते पश्य उत्सर्गः तोयोत्सर्गः तोयोत्सर्गस्य स्तनितं च तोयोत्सर्गस्तनिते
ताभ्यां मुखरः तोयोत्सर्गस्तनितमुखरः। विक्लवो विह्वलः स्यादित्यमरः। घनीभूतां धकारे व्रजन्तीनां अभिसारिकाणां विद्यु
द्भूता चमत्कारेण दर्शितमार्गस्थान्तः क्व व्यभिसारिकाः नगरे राहित ताः सा विभ्रमानुविद्योतयेति भावः॥ ॥ नागि
ति। हे मेघ एकस्मिन् चित्रभवनवलभौ हर्म्योपरिभागे मां रात्रीं नीत्वा पुनः रविसूर्ये दृष्टे सति अध्वशेषं। विविधमार्गं वाह
ये। भवनस्य वलभिः भवनवलभिः तस्यां गोपानसीतु वलभी छादने वक्रदारुणि इत्यमरः। आच्छादनं स्यात् वलभिः
गृहाणामिपादवः। अध्वनः शेषः अध्वशेषः तं। कपोतपालिका भवनवलभौ। सुप्तपारावतायां सुप्ताः पारावताः यस्यां सा सु
प्तपारावता तस्यां। पारावतः कलरवः कपोत इत्यमरः। कस्मात्। चिरविलसनात् चिरकालस्फुरणात् खिन्नविद्युत्कलत्रः चि
रं विलसितं चिरविलसितं तस्मात्। विद्युदेव कलत्रं विद्युत्कलत्रं खिन्नं विद्युत्कलत्रं यस्य सः खिन्नविद्युत्कलत्रः।
कलत्रं श्रोणिभार्ययोरित्यमरः। हे मेघ खलु निश्चयेन सुहृदां अभ्युपेतार्थकृत्याः सज्जनाः न मंदायन्ते विलम्बं न कुर्वन्ति
सर्वदा। अभ्युपेतं स्वीकृतं अर्थं अभ्युपेतार्थः। अभ्युपेतार्थकृत्याः अभ्युपेतार्थकृत्याः अंगीकृत
प्रयोजनकर्त्तव्याः इत्यर्थः। तत्र सकान्तां नायिकां ... रात्रिं कस्यचित्कुटुम्बस्योपरिभागे गमयि

रा म १७
मे-टी
17

ता प्रातः ध्रुवं गंतव्यं यतो मित्राणां अंगीकृतकार्ये संतो विलंबं न कुर्वंतीति भावः ॥ ॥ तस्मिन्निति हे मेघ । तस्मिन् काले प्रातः ।
काले खंडितानां योषितानां नयनसलिलं प्रणयिभिः कांतैः शांतिं नेयं अतः कारणात् त्वं भानोः सूर्यस्य वर्त्म मार्गं
आशु शीघ्रं संत्यज पुनः हे मेघ यतः कारणात् सोऽपि सूर्यः नलिन्याः कमलवदनात् प्रालेयाश्रुं हिमकणरूपं सिक्तमिच्छुः
हर्तुं प्रत्यावृत्तः पुनरागतः । प्रालेयमेव अश्रं प्रालेयाश्रं । प्रालेयं हिमकणवाष्पे स्यं । रोदनं चाश्रु अस्रु वे समरः । सः सूर्यः
त्वयि कररुधि सति रुद्धकिरणे सति अनल्पाभ्यसूयः सूर्यः स्यात् प्रचुरामर्षः स्यात् करान् रुणद्धीति कररुत् तस्मिन्क
ररुधि । अनल्पाऽभ्यसूया यस्य सः अनल्पाभ्यसूयः प्रभाते पतयः खंडितानां स्त्रीणां समीपमागत्य प्रयत्नेन तासां मा
नं त्याजयन्ति ह सोऽप्याश्रुमार्जनं कुर्वंति यदि त्वं भानुं मेघ आवरोधं करिष्यति तदा रात्रिराकुपितापतीनां खंडितानिकटागमाविलंबो
भविष्यति । अन्यच्च नलिनीरूपायाः खंडितायाः स्वकरैस्तस्य वदनात् हिमकणरूपमश्रु मार्जयितुं भानुः पुनः समागतस्य
यावत्त्वं कररोधे कृते त्वयि कृतामर्षो भविष्यति । अतः शीघ्रं त्वया गंतव्यमिति भावः ॥ ॥ गंभीराया इति । हे मेघ गंभीरा
याः सरितः नद्याः पयसि ते छायात्मा प्रतिबिंबशरीरं प्रवेशं लप्स्यते । साक्षात्प्रवेशं कर्तुं अनिच्छोरपि ते नद्याः उपरिगमने
न च्छायाः प्रवेशो भविष्यतीत्यर्थः । छाया एव आत्मा छायात्मा हे मेघ तस्मात्कारणात् अस्याः गंभीरायाः चटुले
शफरोद्वर्तनप्रेक्षितानि विधेयतान् धार्ष्ट्यात् मोघीकर्तुं व्यर्थीकर्तुं न अर्हसि । चटुलाश्च ताः शफर्यश्च चटुलशफर्यः चटु
लशफरीणां उद्वर्तनानि चटुलशफरोद्वर्तनानि ... चटुलशफरोद्वर्तनप्रेक्षितानि पक्ष्यु

नि । चपलमत्स्योद्वर्तनं दर्शनानामित्यर्थः । वीच्यव बुद्बुदलं राधुं द्वल्गलकः । प्रोष्ठी तु शफरी द्वयोरित्यमरः । कः चटुलशफरोद्वर्तनप्रेक्षि
तानि । कुमुदविशदानि । कुमुदवत् विशदानि कुमुदविशदानि कमलवन्निर्मलानि । कः पयसि । चेतसीव प्रसन्ने । चित्तवत्प्रसन्ने
इत्यर्थः । कः स्वः । प्रकृतिसुभगः । स्वभावेनैव सुंदर इत्यर्थः । प्रकृत्या सुभगः प्रकृतिसुभगः । गंभीरायाः मार्गमिच्छेगमनत्यागेन च पुनः न
वक्ष्यमाणानि विंवयो नलमध्यस्थलीनं तस्याः चंचलमत्स्यप्रोद्धलनरूपावलोकनानि लक्षणविलंबरूपावलोकनेन तया
सफलितव्या निष्फलीभावः । तथा च गंभीरां नदीं उद्दिश्य नायके कालेनो हीयते । यथा च तां अनुरागेण विलोकयंतीति पंथा बंधती
धृतं पतितां तां नग्नीकरोति तथापि तेन न भाव्यमिति ध्वनितार्थः ॥ ॥ तस्याः इति । हे सखे तस्याः गंभीरायाः नीलं नीलवर्णं स
लिलवसनं हृत्वा नेत्रस्थानं कथमपि महता कष्टेन भाविष्यतीति । सलिलमेव वसनं सलिलवसनं । कः सलिलवसनं । प्राप्तवा
नीरशाखाः वानीरशाखाः प्राप्ता वानीरशाखा येन तत् । मिलितवेतसशाखमित्यर्थः । तथा मन्ये विडुल
रीतवानीरवंजुला । दीर्घपत्रे यथा विजुलो नादेयी चांबुवेतसे इत्यमरः । कः सलिलवसनं । अतएव किंचित्करधृतमिव हस्तावलंबित
भिवाकरेण धृतं करधृतं । कः सलिलवसनं । मुक्तरोधोनितंबं । मुक्तः धृतः एव नितंबः कटिभागो येन तत् । सक्तनटकटि
भागमित्यर्थः । कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु इत्यमरः । पश्चान्नितंबः स्त्रीकट्याः इत्यमरः । कः । तां लंबमानस्य जलोत्तिकेरु
तावत्कं वस्येत्यर्थः । पुरुषमेतत् ज्ञाता नाः स्वादः पुरुषः विपुलजघनां स्त्रियं विहातुं त्यक्तुं कः समर्थो भवति । अपि तु न कोऽपि । ज्ञा
नःस्वादो येन सः ज्ञातःस्वादः । विपुलं जघनं यस्याः सा विपुलजघना तां विपुलजघनां तस्याः कः मे पूर्वमोलिपरां x भाग x रीपो
रिति यादवः ॥ गंभीरा

उत्कलितकदम्बकं विनोदेन स्त्रगारवामपहसोः नदीतटप्रपतितं वा तु न जलं नीलांबरमिव हरन् तस्त्वगमनं सुरतानु
 सुरतानुरागेण विलंबेन भाविष्यति। यतो विज्ञातनतरुलीरतिरसो नितंबिनीसक्तं न को पि समर्थो भवतीति भावः॥ ॥
तदिति। हे मेघ देवपूर्वं गिरिं देवनामानं पर्वतं उपजिगमिषोः उपगंतुमिच्छोः ते शीतो वायुः नीचैः शनैः वास्यति स
पयिष्यति। देवशब्दः पूर्वं यस्य सः देवपूर्वः तं उपगंतुमिच्छति उपजिगमिषति उपजिगमिषतीति उपजिगमिषु
स्तस्य। क॰ वायुः। त्वन्निष्यंदोच्छ्वसितवसुधागंधसंपर्करम्यः। तव निष्यंदः त्वन्निष्यंदः तेन उच्छ्वसिता चासौ वसुधा
च त्वन्निष्यंदोच्छ्वसितवसुधा तस्याः गंधः त्वन्निष्यंदोच्छ्वसितवसुधागंधः तस्य संपर्कः त्वन्निष्यंदोच्छ्वसितवसुधा
गंधसंपर्कः तेन रम्यः त्वन्निष्यंदोच्छ्वसितवसुधागंधसंपर्करम्यः। निष्यंदः स्रावो देववराष्टे। क॰ वायुः। स्रोतोरंध्रध्व
नितसुभगं। नासिविवरस्यासुंदरं यथा स्यात्तथा दंतिभिर्गजैः पीयमानः। स्रोतसः रंध्रे स्रोतोरंध्रे तयोः ध्वनितं स्रोतोरंध्रध्व
नितं तेन सुभगं। स्रोतोरंध्रध्वनितसुभगस्तं। स्रोतोंबुवेगेंद्रिययोरिति विश्वः। छिद्रं निर्व्यथनं रोकं रंध्रं श्वभ्रं वपा
सुविद्धसमम्। क॰ वायुः। काननोदुंबराणां परिणमयिता। काननेषु उदुंबराः काननोदुंबराः तेषां। गहनं काननं वनमित्य-
गंभीरं नदी उद्धुंब्य देवगिरिपतिं मारुतः त्वां त्रिविधः पवनः सेविष्यति तस्मात्किंचित्कं वो न विधेयमिति भावः॥ ॥तत्रेति।
हे मेघ भवान् तत्र तस्मिन् देवगिरिपर्वते नियतवसतिं निभृतं बालं स्कंदं स्वामिकार्तिकं पुष्पासारैः पुष्पवृष्टिभिः
स्नपयतु। नियता वसतिर्यस्य सः नियतवसतिः तं नियत[illegible]दृस। पुष्पाणाम् आसाराः पुष्पासाराः तैः। स्कं

धारासंपातं आसारः इ० स० । क० भवानी पुष्पमेघीकृतात्मा पुष्पात्मको मेघः पुष्पमेघः अपुष्पमेघः पुष्पमेघः संपद्यमानः कृतः पुष्पमेघीकृतः ।
पुष्पमेघीकृतः आसारेण सह क० पुष्पासारैः । व्योमगंगाजलार्द्रैः । व्योमग० गंगा व्योमगंगा व्योमगंगायाः जलानि व्योम
गंगाजलानि तैः आर्द्रैः व्योमगंगाजलार्द्रैः । आकाशगंगाजलसिक्तैरित्यर्थः । हि यस्मात् पुरु मेतत् । नवशशिभृता वेदृशो
खरेण रुद्रेण ना वासवीनां इदं स्कन्दं धिनीनां चमूनां रक्षाहेतोः तत्तेजः तत् प्रसिद्धं तेजः हुतवहमुखे हुतवहमुखे संभृतं तद्धि ।
नवशशिनं बिभर्तीति नवशशिभृत् तेन नवशशिभृता वासवस्य इमाः वासव्यः तासां वासवीनां । वाहिनी पृतना चमूः इ० स० ।
रक्षायाः हेतुः रक्षाहेतुः तस्य । हुतं वहतीति हुतवहः तस्य मुखं हुतवहमुखं तस्मिन् । क० तेजः असाहित्यं । आदित्यं आतितेजोन अ
सादित्यं धृतं दारासंभवं कार्तिकेयं कुसुमवर्षैः पूजयेति भावः ॥ ॥ ज्योतिरिति । हे मेघ त्वं पावकेः स्कन्दस्य कार्तिकस्य तं म
यूरं पश्चात् गर्जितैः नर्तयेथाः । नर्तयेथाः । पावकस्यापत्यं पुमान् पावकिः तं पावके । मयूरो बर्हिणो बर्ही इ० स० । तं कं भवानी
पार्वती पुत्रप्रेम्णा कर्णे करोति । पिच्छं बर्हं न कुंस करे इ० स० । पुत्रस्य प्रेम पुत्रप्रेम तेन पुत्रप्रेम्णा ।
क० बर्हं । ज्योतिर्लेखावलयि । ज्योतिषः तेजसः लेखाः पंक्तयः ज्योतिर्लेखाः ज्योतिर्लेखानां वलयानि मंडलं अस्यास्तीति
ज्योतिर्लेखावलयि । तेजः पंक्तिमंडलयुक्तमित्यर्थः । अलौ रेखा तु राजिः इ० स० । क० बर्हं गलितं । स्वयं पतितमित्यर्थः ।
क० बर्हं । कुवलयपदलप्रापि । कुवलयस्य दलं कुवलयदलं । कुवलयदले प्राप्तुं शीलं यस्य तत् कुवलयदलप्रापि ।
कर्णोत्पलसंसर्गि इत्यर्थः । क० मयूरं ।

मे.टी रा हरशिरोहस्ताभ्यां पौनानां गौरीहरस्य शरीरीहरशरीस्यैहरशरीरीहरस्य शिनोः कृतया। शिवचंद्रकांता इत्यर्थः। नैघौ अपांगं पश्यतः
१५ धालापांगस्तु निर्मलीकृतनेत्रप्रांत इत्यर्थः। कंगर्जितैः। अद्रिगृहशब्दैर्गुंजितैः। अद्रेः गृहं अद्रिगृहं तेन गुरवः। आद्रिग्र
हराणां गुरवः तैः पर्वतप्रांतध्वानगंभीरैरित्यर्थः। भवानीशंकरवल्लभापत्रं कार्तिकेयमयूरं मादंगिकभावेन स्तनगर्जितमृदंगगं
भीरध्वनिभिर्मैर्नैर्यितो भगतो मयूरस्य भक्तिविधेयाकृतिभावः॥ ॥आराध्येति। हे मेघ त्वं शरजन्मा शरवणभवं स्वामिकार्तिकं दे
वं आराध्य भुविख्यातं। व येथाः धारासंपातमार्गं कृ। शराणां वनं शरवणं तत्र भवः शरवणभवः भुवं संसारे वारो वालेन लोकेइतिशब्दः।
किं करिष्यन्। सुरभितनयालंभजां नदीं चर्मण्वतीं मानयिष्यन्। पूजयिष्यन्। सुरभेः तनया सुरभितनया सुरभितनयानां आलंभः
सुरभितनयालंभः तस्मात् जाता तां सुरभितनयालंभजां तां। गोमेधार्थमानीतगोरुधिरजातामित्यर्थः। कामिव। रंतिदेवस्य राज्ञः कीर्ति
मिव। कं। कीर्तिं भुवि विश्रोतोमूर्त्या परिणतां रूपेण परिणतां जातां। स्रोतसह मूर्तिः स्रोतोमूर्तिः तया। कं। स्थं ड लुघितात्वा ड लुधितः
अध्वायेन सः। पुनः कं। स्थं जलकणभयात् सिद्धद्वंद्वैः मुक्तमार्गः जलानां कणाः जलकणाः तेभ्यो भयं जलकणभयं तस्मात् जलकण
भ भयात्। सिद्धानां द्वंद्वाः सिद्धद्वंद्वाः तैः। द्वंद्वं कलहयुग्मयोरिति। स्त्रीपुंसौ मिथुनं द्वंद्वं युग्मं तु युगलं युगमित्यमरः। मुक्तमार्गो यस्य सः
कं। सिद्धद्वंद्वैः। वीणिभिः वीणायुक्तैः वेणी वीचते येषां ते वीणिनः तैः। रंतिदेवस्य यज्ञपशुरुधिरे तेस्रवन्ती चर्मण्वती नदीद्वंद्वौ
लयागंतव्यमिति भावः॥ ॥त्वयीति। हे मेघ गगनगतयः देवाः तां भुवः एकं मुक्तागुणमिव मुक्ताहारमिव प्रेक्षिष्यंते। गगने
गतियेषां ते गगनगतयः। कस्मिन् सति तस्य [illegible] [illegible] सिंधोः नद्याः जलं आदातुं त्वयि अवनतेन मेसति। देहोन स्व

रो वे व्योम्नि सिंधुर्नदी सरिति स्त्रियामित्यमरः। शार्ङ्गिणः हरेः वर्णस्य वर्णचौरे विप्रकोः रघा मलवर्णतस्करे इत्यर्थः। वर्णं चौरयतीति सः वर्ण
चौरः। तस्मिन्। वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाक्षरे इति अनेकार्थः। चौरैकागारिकस्तेन दस्युतस्करमोषकाः इत्यमरः। कं
वलेः। प्रवाहं प्रति दूरं यथा स्यात्तथा दृष्टीः आवर्ज्य स्थापयित्वा। कः प्रवाहं। दूरभावात् पृथुमपि विस्तीर्णमपि तनुं सूक्ष्मं। कं मुक्ता
गुणं। स्थूलमध्येन्द्रनीलं। स्थूलः मध्ये इन्द्रनीलो यस्य सः स्थूलमध्येन्द्रनीलस्तं। आकाशे विहरंतः सुराः चर्मण्वतीजले शतावि
तरं तां दृष्ट्वा मध्यप्रोतेन्द्रमुक्ताहारमिव ते प्रेक्षिष्यन्त इति भावः॥ ॥तामिति। हे मेघ त्वं दशपुरवधूनेत्रकौतूहलानां आत्मबिं
बं स्वमूर्तिं पात्रीकुर्वन् तां चर्मण्वतीं नदीं उत्तीर्य व्रज। दशपुरस्य रंतिदेवनृपतिराजधानी वध्वः दशपुरवध्वः दशपुरवधूनां
नेत्राणि दशपुरवधूनेत्राणि दशपुरवधूनेत्राणां कौतूहलानि दशपुरवधूनेत्रकौतूहलानि तेषां। वधूर्जाया स्नुषा स्त्री चेत्य-।
कौतुहलं कौतुकं चेत्यमरः। आत्मनः बिंबं आत्मबिंबं तनुं। बिंबोस्त्री मंडलं त्रिष्वित्यमरः। अपात्रं पात्रं कुर्वन् पात्रीकुर्वन्। कं दशपुरवधूनेत्र
कौतूहलानां। परिचितभ्रूलताविभ्रमाणां। भ्रुवो लता भ्रूलताः भ्रूलतानां परिचिताः भ्रूलताविभ्रमाः येषां तानि परिचितभ्रूलतावि
भ्रमाणि तेषां। विज्ञातभृकुटीविलासानामित्यर्थः। कं दशपुरवधूकौतूहलानां। पक्ष्मोत्क्षेपात् नेत्रलोम्नः उन्नमनात् हेतोः उपरिवि
लसत्कृष्णसारप्रभाणां। पक्ष्मणां उत्क्षेपः पक्ष्मोत्क्षेपः। तस्मात्। पक्ष्म स्यान्नेत्रलोम्नि किंजल्के नेत्रलोमनीति रभसः। उपरिवि
लसंतश्च ते कृष्णसाराश्च उपरिविलसत्कृष्णसाराः तेषां प्रभा येषु तानि उपरिविलसत्कृष्णसारप्रभाणि तेषां। उपरिशो
भितनीलपुत्तलिकारुचिनामित्यर्थः। [illegible] पुनः दशपुरवधूनेत्रकौतूहलानां। कुंदक्षेपा

राम २०

मे०टी ऽनुगमधुकरश्रीमुखां। कुंदानां कुंदपुष्पाणां क्षेपः कुंदक्षेपः तेनाऽनुगाश्च ते मधुकराश्च कुंदक्षेपानुगमधुकराः तेषां श्रियं मुष्णंतीति तानि
कुंदक्षेपानुगमधुकरश्रीमुषि तेषां कुंदक्षेपानुगमधुकरश्रीमुषां। कुंदपुष्पाक्षिप्तभ्रमरशोभातस्करणामित्यर्थः। माघ्ये कुंदं स्त्रक
कुस्त्रकइत्यमरः। क्षेपैः इतस्ततश्चालनं। मधुव्रतो मधुकर इत्यमरः। रतिदेवनगरनायिकालोचनान्यमदर्शने न सफलीकुर्वन्तु भ्रजेति
भावनः ॥ ब्रह्मावर्तमिति। हे मेघ त्वं तत् कौरवं क्षेत्रं भजेथाः। कः स्त्वं। ब्रह्मावर्तं जनपदं देशं छायया पयास्त्वच्छायया अधः गाहमानः
सरस्वतीदृषद्वत्योः देवनद्योर्यदंतरं तं देवदेवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते इति मनुः। कथं तं भूः कौरवं क्षेत्रं। क्षत्रप्रधनमभि
शुनं। क्षत्राणां प्रधनं क्षत्रप्रधनं। तस्य पिशुनं क्षत्रप्रधनपिशुनं। अद्यापि शिरःकपालादिमत्तया कुरुपांडवयुद्धसू
चकमित्यर्थः। युद्धमायोधनं प्रधनं प्रविदारणं इत्यमरः। पिशुनौ खलसूचकौ इत्यमरः। तत् किं कौरवं क्षेत्रं। यत्र यस्मिन् कौरवक्षेत्रे गां
डीवधन्वाऽर्जुनः शितशरशतैः राजन्यानां क्षत्रियाणां मुखानि अभ्यवर्षत्। गांडीवं धनुर्यस्य सः गांडीवधन्वा। शितास्ताश्च ते शराश्च शितशरा
शराः तेषां शतानि तानि तैः। कपिध्वजस्य गांडीवगांडीवौ पुंनपुंसके इत्यमरः। मूर्द्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराड् इत्यमरः। कैः
कैः कानिव। त्वं धारापातैः जलधारापातैः कमलानिव। धाराणां पाताः धारापाताः तैः। ब्रह्मावर्तं नाम देशमतिपावनत्वाद्दर्शनपदं त्वे नैव
प्रविशान्तु यत्र क्षत्रियाणां मुक्तिक्षेत्रं विज्ञाय सहस्रशः प्रमीताः। तत्कुरुक्षेत्रमपि तुल्यमनंतत्वात् तेजं अनं विरोचेतो विधेयमिति भावः॥ ॥हि
त्वा इति। हे सौम्य मा गलीवतिभद्र पाः आपः सिषेवे तासां सारस्वतीनां अपां अभिगमनं कृत्वाऽन्तः शुद्धः सन् वर्णमात्रेण स्वरूपमात्रेणै
केवलं भविता असि। मा गमन मस्यास्तीति लांगली निरीषकुटकफालः कृषकोलो गल्लकहलो इत्यमरः। आपः स्त्री भूम्नि वार्वारि इत्यमरः। बंधु
नां प्रीतिबंधुप्रीतिस्तया। सरस्वत्याः इमाः सा [illegible] ता। अभिमतरसां अभीष्टास्वादं हालां मदि लक्ष

२०

तांहित्वा संस्थिता। अभिमतो स्वादुःxरसो यस्याःx अभिमतरसा तां। सुराहलिप्रियाः। हलीमा इत्यम०। कथंभूतां रेवतीलोचनांकां। रेवत्याः लोचने रेवतीलो
चने रेवतीलोचनेतयोः अंकः यस्याः सा रेवतीलोचनांका तां। इत्संगत्विहृपो रकइत्यम०। कथंभूतां रेवतीलोचनांकां प्रतिबिंबितां तासि स्वर्थः। कथं लो
गली बंधुप्रीत्या समरविमुखः। समरात् विमुखः समरविमुखः कुरुपांडवप्रीत्या रलयोरभेदः मुखः। न तु भयेनेत्यर्थः। दुस्तजामपि सुरां
ए लाकृतवधा दिग्मायश्चितार्थं कुरूपणा च विशेषम्; सो हि नन तु भयेन भारतमहायुद्धे बलदेव सरस्वतीजलानि सेवितवान्।
नर्दे... कर्तुं सेव्यते:x करस्तोनि: पापत्वं वर्णमात्रेण लोचिल्लोष्ठ न तु पापात्प्रिशिति भावः॥ ॥तस्मादिति॥ ... स्वंतस्मात् कुरुक्षेत्रा
xभ: सेवनेनx ... अनुकनखलं कनखलस मीपे ताउजह्नोः कन्यां गंगां गच्छेः गच्छेः। कनखलस्य समीपं अनुकनखलं। कं जह्नोः कन्यां सं
गरतनयस्वर्गसोपानपंक्तिंx शैलराजावतीर्णां शैलानां राजा शैलराजः शैलराजात् अवतीर्णा शैलराजावतीर्णा तां। हिमाचलाद् अवतीर्णा
इत्यर्थः। कं: जह्नोः कन्यां।x सागरस्य तनयाः सगरतनयाः। स्वर्गसोपानानि स्वर्गसोपानानि तेषां पंक्तिः स्वर्गसोपानपंक्तिः। सगर
तनयानां स्वर्गसोपानपंक्तिः सगरतनयस्वर्गसोपानपं ... स्याx कि ... आरोहणं स्यात् सोपानं निश्रेणिश्चाधिरोहणमित्यम०। तां
कां या गंगा गौरीवक्त्रभ्रुकुटिरचनां... विहस्य फेनैः। केशग्रहणं इंदोः करोत्... गौर्याः वक्त्रं गौरीवक्त्रं तस्या भ्रुकुटी
गौरीवक्त्रभ्रुकुटिः गौरीवक्त्रभ्रुकुटिः कुटिलास्त्रियामित्यम० ... भ्रुकुटिरचना तां। उमा कात्यायनी गौरीत्यम०। वक्त्रं तस्य भ्रुकुटी
न वक्त्रं वदनं मुखमित्यम०। भ्रुकुटिर्भ्रुकुटिः स्त्रियामित्यम०। ... फेनः कफः फेन इत्यम०। केशानां ग्रहणं केशग्रहणं तत्। इंदुना उमा
लग्नोर्मिहस्ता उर्मयः एव हस्ताः उर्मिहस्ताः इंदोलग्ना उर्मिहस्ता यस्याः सा इंदुलग्नोर्मिहस्ता। चंद्रकलासंसक्ततरंगकरेत्यर्थः। या इंदुल
ग्नोर्मिहस्ता उर्मिहस्ता... कपिलरो...
पार्वतीगंगा शिवास्तिरा... ... ना संप्राप्य पार्वती। ... नोऽनः कपिलरोधदग्धानां बहिसहस्राणां सगरपु

मे.टी त्रारणी स्वर्गप्राप्तिहेतुः तस्यां गंगायां गमनं [illegible] भुक्तिमुक्तिप्रदामिति भावः॥ ॥तस्याः इति॥ त्वं × हे मेघ यदि तिर्यक् सन् तस्याः गंगा
याः अंभः पातुं चेत् यदि तर्कयेत् विचारयेत् तर्हि अस्याः गंगायाः स्रोतसि प्रवाहे संसर्पन्त्या भवतः छायया असौ गंगा अस्थानोपगतयमु
२) नासंगमा इव अभिरामा स्यात्। यमुनायाः संगमः यमुनासंगमः अस्थाने उपगतः यमुनासंगमो यस्याः सा अस्थानोपगतयमु
नासंगमा प्रयागादन्यत्र संगतयमुनेवेत्यर्थः। क. अंभः। अच्छस्फटिकविशदं अच्छश्चासौ स्फटिकश्च अच्छस्फटिकः अच्छस्फटि
कवद्विशदं अच्छस्फटिकविशदं। क. सुरगज इव व्योम्नि आकाशे पूर्वार्द्धलम्बी। पूर्वार्द्धेन लंबितुं शीलमस्य स पूर्वार्द्धलंबी। [illegible]
स्थितं तु त्वं भागे इत्यर्थः। क इव। सुरगज इव ऐरावत इव। पीतगंगाजलस्य तव संक्रमतो गंगा प्रयागादन्यत्र यमुनासंगतेव
वाऽभिरामा स्यादिति भावः॥ ॥आसीनानामिति॥ हे मेघ त्वं शुभ्रत्रिनयनवृषोत्खातपंकोपमेयां शोभां वक्ष्यसि प्राप्स्यसि। त्रि
नयनस्य वृषः त्रिनयनवृषः शुभ्रश्चासौ त्रिनयनवृषः शुभ्रत्रिनयनवृषः तेन उत्खातः शुभ्रत्रिनयनवृषो
त्खातपंकः। उपमातुं योग्याः उपमेयाः। शुभ्रत्रिनयनवृषोत्खातपंकेन उपमेयाः शुभ्रत्रिनयनवृषोत्खातपंकोपमेया तां।
शुक्लः शुभ्रः शुचिः श्वेत इत्यमरः। उक्षा महान्महोक्षः स्यात् इत्यमरः। पंकोऽस्त्री शादकर्दमौ इत्यमरः। क. त्वं। अध्वश्रमविनयने मार्गश्रम
दूरीकरणार्थं तस्य हिमाचलपर्वतस्य शृंगे शिखरे निषण्णः उपविष्टः अध्वनः श्रमः अध्वश्रमः तस्य विनयनं तस्मिन्
कूटोऽस्त्री शिखरं शृंगमित्यमरः। किंभूतं अचलं तस्याः गंगायाः प्रभवं उत्पत्तिस्थानं अचलं हिमाचलं प्राप्य। क. अचलं। आसीनानां उप
विष्टानां मृगाणां कस्तूरिकामृगाणां नाभिगंधैः सुरभितशिलं। नाभीनां गंधाः नाभिगंधास्तैः सुरभिताः शिला यस्य
असौ सुरभितशिलस्तं। पुनः क. अचलं। तुषारैः हिमैः गौरं। तुषारः शीतलः शीतः इत्यमरः। अवदातः सितो गौर इत्यमरः। अवलक्ष
हिमाचलं नदीश्वरस्नेनोपेशानो। हिमाचलस्य कस्तूरीसुरभितशिलासु निवेशं तां नदीश्वरगंगाजन्मनकर्दमाभिध। २९

द्रुष्पतीति भावः ।। ।।अर्हसीति । हे मेघ दवाग्निः तं हिमाचलं च बाधेत चेत् तदा एनं दवाग्निं वारिधारासहस्रैः अलं अत्यर्थं शम
यितुं अर्हसि योग्योसि योग्योसि । दवस्याग्निः दवाग्निः वने च वनवह्नौ च दवो दाव इति ख्याते विश्वः दव दावौ महावने इत्यम० । वारीणां धाराः
वारिधाराः तेषां सहस्राणि वारिधारासहस्राणि तैः । संघट्ट सरलस्कंधसंघट्टः तेन जन्म यस्य सः । सरलस्कंधसंघट्टजन्मा
देवदारुशाखा संसर्गजात इत्यर्थः । अस्त्री प्रकांडः स्कंधः स्यात् मूलाच्छाखावधेस्तरोरित्यम० । कः दवाग्निः । उल्कोत्क्षपितचमरीबाल
भारः । उल्काभिः अग्निज्वालाभिः क्षपिता दग्धाः च मरीणां बालभाराः येन सः उल्का० । विस्फुलिंगदाहितचमरीपुच्छ इत्यर्थः । चिकुरः कु
न्तलो बालः इत्यम० । हीति प्रकोपमर्थः । उत्तमानां महापुरुषाणां संपदः आपन्नार्तिप्रशमनफलाः संति । आपन्नानां आर्तयः आपन्नार्तयः आपन्ना
र्तीनां प्रशमनं आपन्नार्तिप्रशमनं आप० प्रशमनं फलं यासां ताः आप० प्रशमितफलाः । शरणागतजनदुःखदूरीकरणैकफला
इत्यर्थः । पीडितहिमाचलजंतुर्दवानलस्त्वया धारासंपातैः शमयितव्यो यतो महतां संपदः परदुःखैकभंजनफला इति भावः ।। ।।ये इति ।
हे मेघ तस्मिन् हिमाचले ये सरभाः अष्टापदसिंहविशेषाः मुक्ताध्वानं मुक्तनादं यथा स्यात्तथा भवंतं स्वांगभंगाय सपदि लंघयेयुः । तत्र ता
न्त्रासितान् तुमुलकरकावृष्टिहासावकीर्णान् त्वं कुर्वीथाः । सरः भः शालभे चाष्टापदे प्रोक्तो मृगांतरे इति विश्वः । मुक्ताध्वानोय
स्मिन् कर्मणि तं मुक्ताध्वानं । ध्वनिध्वानरवस्वन इत्यम० । स्वस्यांगं स्वांगं स्वांगभंगः स्वांगभंगः तस्मै । तुमुलाश्च ते करकाश्च तुमुलकरकाः ।
तेषां आसमंतात् वृष्टिः तुमुलकरकावृष्टिः तुमुलकरकावृष्टिरेव हासः तुमुल० हासः तेनावकीर्णाः तुमुल० अवकीर्णास्तान् ।
नवोपलप्रवर्षणात् हास्यं तिरस्कृतान् । नवोपलः करका इत्यम० । करकस्तु करके स्याद्दाडिमे करकोपि च कमंडलौ पक्षिभेदे करकेवा
स्ति करका चघनोपले इति विश्वः । नवोपले तु करके [illegible] इति विश्वः । अवकीर्णान् तिरस्कृतान् । कः सरभाः सं
रंभोत्पतनरभसाः । संरंभेणोत्पतनं संरंभोत्पतनं तेन रभसो येषां ते संरंभो० भसाः । क्रोधोद्गमनवेगादित्यर्थः । संरं

मे॰ टी भ: संभ्रमेकोपे विस्त्व:। रभसो वेग हर्षयो: विस्त्व:। पुन्हमे तृप्ति: फ॰ गारंभयत्ना: पुरुषा: परिभवपदं तिरस्कारास्पदं केनस्युः।
अपितु सर्वे स्वस्युः। नि: फलाभ्यासो आरंभमध्य नि: फलो रंभ:। नि: फलारंभै र्यत्नो येषां ते नि:फला॰ यत्ना: [illegible]
२४ का नि: फ॰ कोपयमप्रयत्नाः इत्यर्थ:। परिभवस्पदं: परिभवपदस्तं। अनादर: परिभव: परिभावस्तिरस्क्रियाइत्यमर:। ये अपी
पदस्थिता: भव दुर्लंघ्य न विवेकोद्योगमनेकानप्रयत्ना: भवंतेस्पर्द्धमाना: तान् कुरकपर्पलोपं मालिनाकुर्वंतीति
भाव:।। ।।मनोजेति। हेमेघ तत्र तस्मिन् हिमाचले लंहषद् पाषाणे व्यक्तं प्रकटं अर्द्धेंदुमौलेश्चरणन्यास: अर्द्धेंदुमौलि त्वस्य।
अर्द्ध: खंडः सोमौले: स तदुस्पचरणन्यासं परीयाः प्रदक्षिणां कुर्या:। पल्लवस्थानः स्थितोदपादिसमः। अर्द्धश्चासौ इंदुश्चार्
द्धेंदु: स शेखरे यस्य स विग्रह:। चरणयोन्यांस: चरणन्यास:। तं। फ॰ चरणन्यासं। सिद्धैः योगिभि: रचित रचितः नरं उपहृत
वलिं सिद्धैर्निर्मितियोगपत्ये: विस्त्व:। उपहृतावलि यस्मै स:। उप॰ तं। बलि: पूजोपचारेस्व॰ विस्त्व:। कस्मै पठकर ये: पुंसि
बलि: प्राल्पे गजेस्त्रियां समिति। फ॰ भक्तिनम्र: भक्त्यानम्र: भक्तिनम्र:। हेमेघ यस्मिन् चरणन्यासेदृष्टे सति श्रद्धधा
ना: पुरुषा: स्थिरगणपदप्राप्तये संकल्पयंते विचारयंते। श्रद्दधाना: श्रद्धायुक्ता: श्रद्धा विश्वासयुक्ता स्तिकास्तिक इति
ति पादव:। स्थिरा अव्यंते गणाश्च स्थिरगणा तेषां पदं स्थानं स्थिरगणपदं तस्य प्राप्ति: स्थिर॰ प्राप्तिस्तस्यै। पदं य
वसितं त्राण स्थानलक्ष्माह्रिवस्तुष्वित्यमर:। फ॰ पुरुषा:। करणविगमात् देहत्यागात् ऊर्ध्वं उद्धूतपापा:। करणानां वि
गम: करणविगम:। तस्मात्। करणं साधकतमं क्षेत्रगात्रेंद्रियेष्वपीत्यमर:। उद्धूतानि पापानि येषां ते उद्धू
त पापा:। पापं किल्बिषकल्मषमित्यमर:। साधकानां [illegible] इति [illegible] नयेभ[illegible] च संताप उत्तमे

हिमाचलकन्दरायां श्रीरुद्रेणस्वश्रीचरणमुद्रायां कांचित्सिद्धिन्नप्रदक्षिणीकुर्वन्‌व्रजेति भावः॥ ॥शब्दायन्ते इति हे मेघ तत्र
हिमवच्चरणसमीपे अनिलैः पवनैः पूर्यमाणाः कीचकाः सच्छिद्रवंशाः मधुरं यथा स्यात्तथा शब्दायन्ते शब्दं कुर्वन्ति।
गेयवाहा किन्नरामुखगाइत्यः। कीचकवेणवस्ते स्युः ये स्वनन्त्यनिलोद्धताइति। च पुनः संरक्ताभिः अनुरक्ताभिः
किन्नरीभिः त्रिपुरविजयः गीयते। ये पाल्यां पुराणां समाहारः त्रिपुरं। त्रिपुरस्य जयः त्रिपुरजयः। हे मेघ कंदरेषु
निर्ह्रादी प्रतिध्वानिकः ते ध्वनिः शब्दो मुरज इव मृदंगवाद्य इव चेत् यदि स्यात् तत् पशुपतेः रुद्रस्य समग्रः संगीतार्थः
भावी भविता। दरीतु कंदरी वा इत्यमरः। मृदंगा मुरजा भेदास्त्व इत्यमरः। संगीतस्यार्थः संगीतार्थः। अर्थोभिधेयरैवस्तुप्रयोजन
निवृत्तिषु इत्यमरः। कंदरातु प्रतिध्वनिनैव भवद्ध्वनेन सर्वध्वनिना वलयता तत्पशुपतेः नव सोऽसवः पूर्वोभावः भविता इति भा
वः॥ ॥प्रालेयाद्रेरिति। हे मेघ त्वं प्रालेयाद्रेः हिमाचलस्य उपतटं तट समीपे तानि तान् अतिक्रम्य उल्लंघ्य क्रौंचरंध्रं क्रौंचप
र्वतस्य बिलं मार्गं अतिक्रम्य तेन क्रौंचरंध्रमार्गेण उदीचीं दिशं अनुसरेः नत्वा तमनुगच्छेः सर्वथा प्राले यस्य असौ अद्रिः प्रालेया
द्रिः तस्य प्रालेयाद्रेः हिमवतः इत्यर्थः। क्रौंचस्य रंध्रं क्रौंचरंध्रं। हंसद्वारं हंसानां द्वारं हंसद्वारं मानसं प्रति स यथः। कं. क्रौंचरंध्रं। भृगुप
तियशोवर्त्म। भृगुणां पतिः भृ. नि. तस्य यशः भृ. यशाः। भृगुपतियशोऽसः वर्त्म भृगुपतियशोवर्त्म। पूर्व निकटे धनुर्वे
दमधीयता परशुरामेण स्वामिकार्तिकेयस्य ईर्ष्याक्रौंचपर्वतशिखरं तीक्ष्णबाणपुंखेन भित्त्वा हीरधारा निःसारि
ता तया धारया जगत्प्रसिद्धा क्षालितनिमितकाधाः तमनु निर्गमनमार्गं रोभीति यं कृत्वा सौ आयामप्रवृत्तिः स।

मे.टी तेन शोभितं वलिलं यस्य सः। तिर्यगायामशोभी। कृष्णवलिनियमनाभ्युद्यतस्य विष्णोः श्यामः पाद इव। बलेर्नियमनं बं। नात
स्मै अभ्युद्यतः। बन्धनोद्यतः। तस्य बलिबंधोद्यतस्येत्यर्थः। हिमाचलस्य सर्वाभ्युदयमयीभूः त्रिलोकाक्रांत्यैव पर्वतविवर
मार्गेण वामनदेवचरणसमानशोभं सहऽनेनशोभां गच्छेरिति भावः॥ ॥गलो इति। हे मेघ त्वं ऊर्ध्वं गत्वा कैलासस्यातिथिः
स्याः। स्युरावेशाकर्मतुरतिथिर्नाभिर्हागेनेद्धस-। कः। कैलासस्य दशमुखभुजोच्छ्वासितप्रस्थसंधेः दशमुखनियस्य
सः दशमुखः तस्य भुजाः दशमुखभुजाः तैः उच्छ्वासिताः शिथिलिताः प्रस्थसंधयो सानुप्रदेशाः यस्य सः दशमुखभुजोच्छ्वा
सितप्रस्थसंधिस्तस्य। प्रस्थानां संधयः प्रस्थसंधयः। रावणभुजशिथिलीकृतसानुप्रदेशस्येत्यर्थः। कः। कैलासस्य त्रि
दशवनितादर्पणस्य त्रिदशानां वनिताः त्रिदशवनिताः तेषां दर्पणः त्रिदशवनितादर्पणः तस्य स्निग्धभूमेराधिक्यात्
प्रतिबिंबप्रवेशः ततो दर्पणोऽसौ प्रेक्षा। दर्पणो मुकुरादर्शौ इत्यमरः। सः कः यः कैलासः खं गाढ्य यैः शिखरोन्नतिभिः स्वेआ
काशं वितत्य व्याप्य स्थितः सन् त्र्यंबकस्य प्रतिदिनं राशीभूतः अट्टहास इव दृश्यते। [illegible] गालां उच्छ्रायः खं। यः तेः त्री
णि अंबकानि यस्य सः त्र्यंबकः। तस्य त्र्यंबकस्य। अंबकं लोचनं दृष्टीति हलायुधः। अराशयः राशयः संपद्यते तथाभू
तः राशीभूतः अट्टवत् हासः अट्टहासः। कः शंगोच्छ्रायैः। कुमुदविशदैः श्वेतकमलवत् धवलैरित्यर्थः। कुमुदवन्ने
विशदाः कुमुदविशदाः तैः। सिते कुमुदकैरवे इत्यमरः। नानाशोभासमन्वितं कैलासं त्रिलोकयेति भावः॥ ॥५९॥ उत्पश्यामीत्यस्य
ति। हे मेघ अहं त्वयि तटगते सति पर्वततटगते सति अद्रेः हिमाचलस्य शोभां हलभृतः बलभद्रस्येव उत्पश्यामि।
दृश्यामि। हलं बिभर्तीति हलभृत् तस्य [illegible]

कः शोभां । मेचकेनीजेवासस्ति अंसेन्यस्ते स्कंधन्यस्तेसति भवित्री । कालः श्यामलमेचकाइत्यमरः । नीलमाधादनंवासहस्त ।
अंसे न्यस्तं अ॰ सं नस्निग्धस्कंधो भुजशिरोंसोस्त्री इत्य॰ । पु॰ शोभां । स्निग्धभिन्ननयनप्रेक्षणीयां । स्निग्धानि च तानि नयनानि
च स्नि॰ नि । तैः प्रेक्षणीया । स्नि॰ प्रे॰ या: x तैः प्रेक्षणीयाः । स्नि॰ प्रेक्षणीयाः । तां । निश्चलैत्रदृश्यामित्यर्थः । क॰ लापि । स्निग्ध
भिंनांजनाभे । भिन्नं च तत् अंजनं च भिं॰ नं । स्निग्धं च तत् भिन्नांजनं च स्निग्धभिन्नांजनं । स्नि॰ नांजनवत् आभा यस्य सः स्नि
ग्ध॰ न नाभः तस्मिन् । सस्नेहमार्जितकज्जलच्छविस्तथा इत्यर्थः । क॰ अद्रेः । सघः ॐ द्विरददशनच्छेदगौरस्य । द्विरदस्य दशनः द्वि
रददशनः । सघः ॐ सोद्विरददशनछेदः । द्विरददशनः तस्य छेदः । सघः कर्मा द्विरददशनछेदः । सघः तत्द्विरदद
शनच्छेदवत् गौरः । सघः कर्मा द्विरददशनच्छेदगौरः तस्य । सद्यः छिन्नगजदंतशकलवद्धवलस्येत्यर्थः । छिन्नं तत् कृतं
दंतं छिन्नलिखितवर्णवर्णादित्य॰ । द्विरदोनेकपो द्विपइत्यमरः । रदनाद्दशनादंताः रदा इत्य॰ । पीनो गौरो हरिद्राभः इत्य॰ । अंजनवर्णस्य
मिकैलासशिखरगते सति रजनीशोभां तथा नीलांबरबलभद्रस्येव भवति इति भावः ॥ ॥ तस्मिन्निति । हे मेघ
तस्मिन् कैलासे गौरी पार्वती यदि पादचारेण चरणगमनेन क्रीडाशैले क्रीडापर्वते विचरेत् गच्छेत् तां नदि संअग्रयायी ।
अग्रेसरः सन् मणितटारोहणाय सोपानत्वं कुरु । पादयोः चारः पादचारः तेन । क्रीडायाः शैलः क्रीडाशैलः तत्र । अग्रेया
तुं शीलमस्येति सः अग्रयायी । मणीनां तटाः म॰ तटाः । मणितटेषु आरोहणं म॰ णं । तस्मै । सोपानस्य भावः सोपान
त्वं । आरोहणं स्यात् सोपानैर्निःश्रेणिस्त्वाधिरोहणी इत्य॰ । क॰ सहाभंगीभूतः भोगी कल्लोलरचनया । विरचितवपुः ॥

मे. टी भंगीनां भक्तिः भंगीभक्तिः तया विरचितं वपुर्येन सः त्रि. पु. । क. स्ते । स्तंभितानां तर्द्वीचीचयः स्तंभितः अंतर्जलस्य ऊघो येन
सः स्तं. घ. ट. । घनीभूतजलप्रवाहस्य सः । क. गौरीभुजगवलयं हित्वा शंभुना दत्तहस्ता । भुजंगस्य वलयः भु. य. । तं । क
टकवलयोस्त्रियामिस्य । दत्तः हस्तो यस्याः सा । द. स्ता । पार्वती केलासमानात टेभुवि रोहार्थं चरणाभ्यां विचरेत् तदा
त्वया स्वशरीरं कोठनीकृत्य सभवानीरोहणदायतस्य सालुपञ्च सोपानत्वं कर्तव्यमिति भावः ॥ ॥ तत्रेति । हे मेघ तत्र
तस्मिन् कैलासे सुरयुवतयः त्वां यंत्रधारागृहत्वं क्रीडामंदिरत्वं वं अनेष्यंते न्यंति । प्रापयिष्यंति । सुराणां युवतयः सुरयुवत
यः । यंत्रस्य धाराः यंत्रधाराः यंत्रधाराभिरन्वितं गृहं यंत्रधारागृहः तस्य भावः यंत्रधारागृहत्वं । क. स्त्वं । कुलिशावलयोद्
घट्टनोद्गीर्णतोयं । कुलिशानां वज्राणां वलयाः कु. या. तैः उद्घट्टनं । कुलिशवलयोद्घट्टनेन उद्गीर्णं तोयं
यस्मात् सः कुलिशावलयोद्घट्टनोद्गीर्णतोयः तं । वज्रवेष्टितकंकणाघातनिःसारितजलामित्यर्थः । अत्र कुलिशैर्लिखिता
नवज्रं यत्र लिखितं यः । कटकं दवलयोस्त्रियामिस्य । हे सखे यदि घर्मलब्धस्य ग्रीष्मे प्राप्तस्य तव ताभ्यः देवांगनाभ्यः मोक्षो न
स्यात् । तदा ताः देवांगनाः श्रवणपरुषैः श्रवणकटुकैः गर्जितैः भीषयेः । घर्मे लब्धः घर्मलब्धः तस्य । घर्मो निदाघः स्वेदः स्यादिम ।
श्रवणयोः परुषाः श्रवणपरुषास्तैः क. ना. । क्रीडालोलाः । क्रीडायां लोलाः क्री. । देवः क्रीडार्थं त्वां यदि रुंधेयुः तदा त्वं देवकार्ये
विलंबः स्यात् ततो भयंकरगर्जितैः भीषयित्वा तत्र गंतव्यमिति भावः । हे मांभोजप्रसविसलक्षितिनिति । हे जलद त्वं तं नगं
द्रं कैलासं निविशेः उपभुंक्ष्व । क. स्व । मानससलिलस्य आदानं निस्यर्थः । क. सलिलं । हे मांभोजप्रसवि । सप

हेम्नः अंभोजा हेमांभोजानि । हेमांभोजानि प्रसूते तत् हेमांभोजप्रसवि । स्वर्णकमलजनकमित्यर्थः । किं कुर्वन् । ऐरावतस्य इंद्र
गजस्य कामं असर्वक्षणमुखपटप्रीतिं कुर्वन् । मुखस्य पटः मुखपटः तस्य प्रीतिः मुखपटप्रीतिः क्षणं मुखपटप्रीतिः क्षणमुख
पटप्रीतिः । तां पु० किं कुर्वन् । सलिलैर्गतैः कल्पद्रुमकिसलयानि । धुन्वन् कंपयन् । कीदृशं तं त्रिभुवनसुंदरेस्त्रियां । प्रमदाप्रमेक्रीड
ते जातं वत्प्रेवेराद्यार्णः । कल्पद्रुमाणां किसलयानि कल्प० नि० । वट्हुपोस्त्रीकिसलयमित्यम० । कानीवा अंशुकानीवा चैलं व
सनमंशुकमित्यमरः । अंशुकं वस्त्रमात्रे स्यात् परिधानोत्तरीययोरिति शाश्वतः । वातैः वातैः । नानाचेष्टैः । अनेकप्रकाररचितरचि
तैरित्यर्थः । कैलासस्य सह अभिवंततोमित्रगढहेतु पर्येऽच्छा भोगो मैत्री फलं कर्तव्यमिति भावः । मेघपर्वतयो रक्तार्थ यो रवि
चंद्रयोः शाद्विलीभूतयोः निःसंदेहयोः मित्रतानवादिति ॥ ॥ तस्येति । हे कामचारिन् स्वेच्छाचारिन् उत्संगं विहाय रंकहृत्स० ।
रतस्य कैलासस्य उत्संगे अंकोले कांपूरीदृष्टा पुनः न द्रक्ष्यसे किं अपितु द्रक्ष्यसे वा । कामं यथा रतीति कामचारी तस्य संबोध
नं हे कामचारिन् । कथंभूतां अलकां । स्रस्तगंगादुकूलां । स्रस्तं स्थानभ्रष्टं गंगाख्यं दुकूलं यस्याः सा स्रस्तगंगादुकूला
गंगादुकूलं सूक्ष्मवस्त्रं स्यात् दुकूलं क्षौमसितांशुकेऽपीति शाश्वतः । कस्य उत्संगे कामिनीव । प्रणयिनः भर्तुः उत्संगे कामिनीव । सा
का या अलकाव : युष्माकं काले वर्षाकाले उच्चैः विमानैः अभ्रवृंदं मेघसमूहं वहति । व्योमयानं विमानो स्त्री स० । विमा
नो स्त्री देवयाने सप्तभूमिकसद्मनीति यादवः अभ्रवृंदं अभ्र० । कथं० अभ्रवृंदं सलिलोद्गारं । सलिलोद्गि
रं तीति सलिलोद्गारं जलप्रस्रवणमित्यर्थः । [illegible] कामिनीव केशसमूहमिव । क० अलकं ॥

रा म २५

मे० टी

25

मुक्ताजालग्रथितं। पोषितं यां मौक्तिकैः मुक्ताः इति पाठः। जालं समूहः आनायो गवाक्षः जालकानि पीस। अलकायाः के
लासमध्यभूमिस्थत्वात् गंगापास्त्र दुकूलवर्तित्वात् गंगाप्रतिबिंबनैः कैलासस्य पांशुकैरलकायां कौतुकेंगे कां
तुपाइवाट्ठ नभेति सा तु अलकापाः। ज्ञानेसंदेहनलसानकामचारित्वप्रअलकाहानमुचितं प्रियांगांत्युकाछ
मिति हि कोतं कथितं रेतुमन तव चैतद्रोहस्थानात् ज्ञानमुचितमिति भावः॥ ॥विद्युत्वन्तं इति। हे मेघ पत्र यत्र स्यो अ
लकायां प्रसादाः तैः तैः विशेषैः त्वां तुलयितुं सदृशीकर्तुं अलं समर्थाः। प्रासादो देवभूभुजां गृहं। अलं भूषणं
पर्याप्तिशक्तिवारणवाचकमित्यमरः। कथंभूताः विद्युत्वन्तं विद्युत् अस्ति यस्मिन् सो विद्युत्वान् तं विद्युत्वन्तं। क० प्रासादाः
ललितवनिताः। ललिताः वनिता येषु ते ललितवनिताः। क० भूतं त्वां। सेंद्रचापं। इंद्रस्य चापः इंद्रचापः इंद्रचापेन सहितं
तं मानः सेंद्रचापस्त्वां। कथंभूताः प्रासादाः सचित्राः। चित्रैः सह वर्तमानाः सचित्राः। क० त्वां। स्निग्धगंभीरघोषं। स्नि
ग्धः गंभीरः घोषो यस्य सः तं स्निग्धगंभीरघोषं त्वां। घोषस्यापि स्यो बुद्धध्वानो इति शब्दार्णवः। क० प्रासादाः। संगीता
र्थं प्रहतमुरजाः। प्रहता वादिता मुरजा मृदंगा येषु ते प्रहतमुरजाः वादितमृदंगाः इत्यर्थः। कथं त्वां। अन्तस्तोयं अ
न्तःमध्ये तोयं यस्य सः तं अं० पस्त्वां। क० प्रासादाः मणिमयभुवः। मणिमयाः भुवो येषु ते मणिमयभुवः। रत्नमयभुवः।
रत्नमयभूमय इत्यर्थः। कथं० त्वां तुंगं उन्नतं। क० प्रासादाः अभ्रंलिहाग्राः। अभ्रं लिहन्ति अभ्रंलिहानि अग्राणि येषां ते अभ्रंलिहाग्राः। आकाशस्पर्शि
न इत्यर्थः। अलकाप्रासादास्तव सर्वानुकारामा — — :आ २५

संयुता अतः प्रासादैः विभिन्नतायोग्यत्वात्तत्र गमनेनावश्यं कार्यं इत्यादि इति भावः ॥ ॥ राजकरूपामादृति ।
हे मेघ यत्र यस्यां अलकानगर्यां बाहाः तुरंगाः दिनकरहयस्पर्द्धिनः सन्ति वाजिवाहार्वगंधर्वहयसैंधवसप्तयः इत्यमरः । दिनकरस्य हयाः दि-
नकरहयाः तान् स्पर्द्धितुं शीलं येषां ते दिनकरहयस्पर्द्धिनः । के वाहाः । राजरूपया माः । राज्यवल्लभया माः । राजप्रियाः । राजावल्लभतसं
धीसहस्यम । हे मेघ यत्र यस्यां अलकायां करिणः हस्तिनः शैलोदग्राः पर्वतोद्धताः सन्ति । शैलवत् उदग्राः शैलोदग्राः । के इव ।
त्वमिव । मेघ इव दानसदृशस्यापि इत्यर्थः । के करिणः । प्रभेदात्रमदस्रावैः त्वं इश्मंतः । हे मेघ यत्र यस्यां अलकायां योधाग्रण्यः ।
रणस्य वर्तिनः प्रतिदशमुखं रावणाभिमुखं संयुगे संग्रामे तस्थिवांसः स्थितवंतः । योधानां अग्रण्यः योधाग्रण्यः दशा
मुखस्याभिमुखं प्रतिदशमुखं । के योधाग्रण्यः । चंद्रहासव्रणांकैः खड्गक्षतचिह्नैः प्रसादिताभरणरुचयः प्रतिबिंब
भवल्लकांतयः । चंद्रहासस्य व्रणाः चंद्रहासव्रणाः तेषां अंकाः चंद्रहासव्रणांकाः तैः । खड्गे तु निस्त्रिंशचंद्रहासासिरिष्टयः
इत्यमरः । चंद्रहासो रावणस्य खड्गः आजेपि [illegible] तिरावणः [illegible] लोहितयामीमरुः [illegible] कीवेनाडीव्रणः पुमानित्यमरः । प्रसा
दिष्टाभरणस्य रुचिर्येषां ते प्रसादिष्टाभरणरुचयः । अलकासहवासात् यह स्तिबीराः भुवनत्रयेपि नसंतीति भावः ॥ ॥
हस्तेइति । हे मेघ यत्र यस्यां अलकायां वधूनां देववधूनां हस्ते लीलाकमलं क्रीडाकमलं वर्त्तते सदा तिष्ठति । एते
नवाऽरदतोः चिह्नसूचितं । हे मेघ यत्र यस्यां अलकायां वधूनां अलकेषु केशपाशेषु बालकुंदानुविद्धं अस्ति । अलका
भूर्लकुंतलाइत्यमरः ।

मे० टी० बालकान्ध्यते कुंतलश्रव बालकुंदाः तैः अनुविद्धं बालकुंदानुविद्धं। एतेन हेमंतर्तोः चिह्नं सूचितं। हे मेघ यत्र यस्यां अ० यां वधू
नां आननश्रीः लोध्रप्रसवरजसा लोध्रपुष्पपरागेन पांडुतां नीताः प्राप्ताः। आननस्य श्रीः आननश्रीः। लोध्रतरोः प्रस
वाः तेषां रजः लोध्रपुष्परजः तेन। गालवः बालकौ रोध्रस्य शरीरे टसिल्ये मार्जनाविस०। स्यादुत्पादे फले पुष्पे प्रसवो गर्भ
मोचने इत्य०। एतेन शिशिरर्तोः चिह्नं सूचितं। हे मेघ यत्र यस्यां अ० वधूनां चूडापाशे केशपाशे नवकुरवकं अस्ति।
नवश्चासौ कुरवकः नवकुरवकः। एतेन वसंतर्तोः चिह्नं सूचितं। हे मेघ यस्यां अ० वधूनां चारु कर्णे शिरीष
पुष्पं अस्ति। चारु रम्यश्चासौ कर्णश्च चारुकर्णः तस्मिन्। एतेन ग्रीष्मर्तोः चिह्नं सूचितं। हे मेघ यत्र यस्यां अ० वधूनां सीमंते के
शसमूहे त्वदुपगमजं नीपं नीपकुसुमं अस्ति। सीमंते मस्तके केशरचनायां सीमंत मस्तिष्काः इति शब्दार्णवः। तवदुप
गमात् आगमात् जायते इति त्वदुपगमजं। नीपो धूलीकदंबोन्यः सुवासास्तस्य पुष्पं कदंब०। एतेन नववर्षर्तोः सूचितं। यस्यां
अ० यां सर्वर्तुसंपन्नाः सर्वे वर्तंते इति भावः॥ ॥यस्यां इति। हे मेघ यस्यां अ० यादृशाः हर्म्यस्थलानि सितमणिम
यानि ४ हर्म्यपरिपाटिकानि एत्य प्राप्य मधु मद्यं आसेवंते। मधु मद्यं पुष्परसे ऽसम०। हर्म्याणां स्थलानि [illegible]
कः हर्म्यस्थलानि ४ सितमाभ्यंते मणिमयानि सितमणिमयानि प्राः सितमणि प्रचुराणि प्रचुराणि सितमणि [illegible] स्थलानि।
हर्म्यस्थलानि स्फोतिश्छायाकुसुमरचनानि स्फोतिर्बालो ज्योतिश्छाया [illegible] प्यो तिश्छायाः यास्यो तिश्छाया क० तस्क
एवं कुसुमानि स्फोतिश्छायाकुसुमानि [illegible] ज्योतिश्छायाकुसुमरचनानि। हर्म्य

स्यं स्फ प्रतिबिंबितं नक्षत्रपुष्पप्रकाराणि ज्योतींषि तानि भाः ज्वालाः ददत्कुप्रतार्थो ध्वरास्मन्निदति नैनयं तैः। धापासूर्य
पिपासां तीसं। क. यक्षाः उत्तमस्त्रीसहायाः। उत्तमाश्च ताः स्त्रियश्च उत्तमस्त्रियः सहायो येषां ते। क.
मधु रतिफलं। रतिरेव फलं यस्य तत् रतिफलं। सुरतैकफलमित्यर्थः। क. मधु। कल्पवृक्षप्रसूतं। कल्पवृक्षेभ्यः
प्रसूतं कल्पवृक्षप्रसूतं। देववृक्षजनितमित्यर्थः। केषु सत्सु। पुष्करेषु नादितेषु। आहितेषु। ताडितेषु सत्सु। पुष्करं
कटिहस्ताग्रे वाद्यभाण्डमुखे जले। शोभितेति पद्मेनी औ जधि विशेषयोरिति स। क. पुष्करेषु। त्वद्गंभीरध्वनि
षु। गंभीरश्चासौ ध्वनिश्च गंभीरध्वनिः। तव गंभीरध्वनिः त्वद्गंभीरध्वनिः। त्वद्गंभीरध्वनिरिव ध्वनिर्येषां ते।
त्वद्गंभीरध्वनयः तेषु। मेघगर्जितमंद्रशब्देषु। एतावता द्रकांतमयानि प्रासादाग्रस्थलान्यारुह्य सुरतैकफलं
कल्पवृक्षोद्भवां मदिरां निपीय संगीतनृत्यादिपराः प्रमोदंतीति भावः॥ ॥ गत्युत्कंपादिति। हे मेघ यत्र यस्यां
अ. यां कामिनीनां अभिसारिकास्त्रीणां नैशो मार्गः रात्रिमार्गः सवितुः सूर्यस्योदये एतैः वस्तुभिः सूच्यते। नि
शायां भवः नैशः। एतैः कैः। गत्युत्कंपात्। गमनशरीरकंपात्। अलकपतितैः केशपाशपतितैः मंदारपुष्पैः कल्पवृ
सुप्रसूनैः। गत्या उत्कंपः गत्युत्कंपः। तस्मात्। अलकेभ्यः पतितानि अल. नि तैः। मंदाराणां पुष्पाणि मंदा। तै
तैः। मंदारः पारिजातः कल्पद्रुमः। पुनः कैः पत्रच्छेदैः। पत्र कनकखंडैः। पत्राणां छेदाः पत्रच्छेदाः तैः पत्रच्छेदैः।

ताम २७
मे.टी
३१

अंगं त स गवि रोब कर्ख डैर स्यर्थः। नमालप्रवातिलकचित्रकालिविशेषकमिस। पुनः कैः कर्णविभ्रंसिभिः। अवरा
भ्रष्टैः। कनककमलैः कर्णभ्रः विभ्रंशिभुरी। यंयेषां ता लिकर्णविभ्रंसीनि तैः। कनककानां कमलानि कमलानि तैः।
पुनः कैः मुक्ताजालैः शिरःपतितैः मुक्तासमूहैः। मुक्तानां जालानि मुक्ताजालानि तैः। जालं समूह आनायेगवाक्षेसा
रकावपीस्म। पुनः कैः स्तनपरिसरछिन्नसूत्रैः हारैः। स्तनयोः परिसरः स्तनपरिसरः स्तनपरिसरे छिन्नानि सू
त्राणि येषां तैः स्तनपरिसरछिन्नसूत्रा सैः। कुचप्रदेशत्रुटितसूत्रैरित्यर्थः। मार्गपतितैर्मन्दारपुष्पादिभिः मे रभिसारि
कामार्गो यन्निशि ज्ञायते इति भावः॥ ॥नीवीबन्धोच्छ्वसितशिथिलं नीवी आः बंधः नीवी बंधः ×६ त्रि। हे मेघ य
त्र यस्यामलकायां प्रियेषु आगतानां नानोचूर्णमुष्टिं सुगंधचूर्णमुष्टिः रत्नप्रदीपान् अभिमुखं संमुखं प्राप्य विफला भवति \
यस्याः स्त्रीः अंगनायषांगनाः। तासां चूर्णस्य मुष्टिः चूर्णमुष्टिः। रत्नानां प्रदीपाः रत्नप्रदीपास्तान् रत्नैः सह
प्रियेषु क्षौमं सूक्ष्मवासः रागाद् आक्षिपत्सु मुञ्चत्सु सत्सु। क्षौमं दुकूलमित्यमरः। कं क्षौमं। नीवीबंधोच्छ्वसितशि
थिलं। ×तस्य उच्छ्वसितं नीवीबंधात् उच्छ्वसितं नीवीबंधोच्छ्वसितं शिथिलं। नीवी परिपणेग्रंथौ स्त्रीणां जघ
नवाससीति विश्वः। कः प्रियेषु। अनिभृतकरेषु। अनिभृताः चपलाः कराः येषां तेऽनिभृतकराः तेषु। चपलहस्तेषु
स्यर्थः। कः रत्नप्रदीपान्। आर्चिस्तुंगान् अर्चिभिस्तुंगाः तान्। मयूखैरुन्नतानीत्यर्थः। २३
अ

र्वं हेतुः शारवा लिप्या प्रियसमरः। कः पक्षांगनानां। हीमरवानां। हू पामूढाः। हीमूढाः। ता सां। तथा या या मुग्धानामपि सर्वार्थः। मं
द हासं हा स्वपार्श्वे अलज्जा इत्यर्थः। को ते। सुरतार्थं निवोढनीवी मोक्षे दत्ते सति जाततत्राः मुग्धांगनाः सुगंधपुष्पकर्पूरादिसु
रभिः रतप्रतापान्तर्नु वीरयंतीति भावः।। ।।आनंदोत्थ विलि। हे मेघ पथ। यात्रिनेत्रानां पक्ष्मलानां नयं धनसलिलं आनंदो
त्थं अस्ति। अन्यैर्निमित्तैर्नास्ति। पर्यालो अन्यकार्यारो कोना स्त्रीसर्गः। वित्ताधिपः कुबेरः। स्यात्प्रभो धानकपक्षयोः
इति विश्वः। हे मेघ पत्रय। कांता कुसुमशरजातत्तापात् अन्यत् तापो नास्ति। कुसुमानां शराः पञ्च पञ्चसः कुसुमशराः तस्मा
त् जातः पतत्त्विति कुसुमशरजातस्तस्मात्। कः कुसुमशर रतिरूपा नारी इष्टवल्लभसंयोगसाध्यात् इष्टानां संयोगः इष्टसंयोगः। तेन सा
ध्यः इष्टसंयोगसाध्यात् प्रियतमासंयोगसाध्यादित्यर्थः। हे पत्र पं। प्रणयकलहात् अन्यत्र विनाविप्रयोगो वपनिवि
योग प्राप्तिर्नास्ति। प्रणयस्य कलहः प्रणयकलहः तस्मात्। विप्रयोगस्याप वर्तिः वि। नि। हे पं। वित्तेशानां यक्षाणां यो
वनाद्न्यद् वयः नास्ति। सदैव यौवनयुक्ताः संति। वयः पक्षिणि बाल्यादौ च यौवनमात्रके इत्यमरः। पत्र सादे वासः तत्
कांतानि: सहरमंतो विरहतापवाद्वा कन्यत्वेन कदाचिदप्यनुभवंतीति भावः।। ।।पत्रोत्ता। हे पं। पादपाः रक्ताः विषु
पुष्पाः विदष्टां तो निटपीपादपः स्त्रीरुद्धि इत्यमरः। नित्यपुष्पाः। ये यांते नि सपुष्पाः सदैव पुष्पपुष्पाः। कः पादपानु

मत्तभ्रमरमुखराः उन्मत्ता भ्रमरैः मुखराः उन्मत्तैः भ्रमरैः मुखराः। मधुपानाधमधु
पानादप्रकाः इत्यर्थः। चदृष्पदभ्रमरालयस्य:

मे॰टी

मेहे॰ यां। नलिनाः निसपद्माः संति। स दास्फुटकुसुमाद्दसथः। निसंपद्मा। नेयासर्सीताः निसपद्माः। क॰ नलि
न्यः। हंसश्रेणीरचितरसनाः। हंसानां श्रेण्यः हं॰ ण्यः। हंसश्रेणीभिः रचिता रसना याभिस्ताः। हंसपंक्तिभिः विरचि
तक्षुद्रघंटिकाद्दसथः। श्रेणीत्रेखासमूह एतयदृस॰। रसना क्षुद्रघंटिकाद्दस॰। हे॰ यां। भवनदीर्घिकाखिनः। गृहमयूराः
केकोत्कंठाः संति। भवनस्य दीर्घिकाखिनः भ॰ नः। केकयाउत्कंठाः केका॰ ठाः। केकावाणी मयूरस्येत्यमरः। क॰ भवनदीर्घिकावि
ननन्निसभास्वकलापाः। निसभास्वेताः कलापाः पुच्छाः ये वां ते। कलापोमत्तपर्णेवहे। श्रेणीरे सतेविसवे॰। हे॰
यां। प्रदोषाः निसऽस्योत्स्नाप्रतिहततमोवृत्तिरम्याः संति। निसा चासौ ज्योत्स्ना च नि॰ स्नयाप्रतिहता चासौ
तमोवृत्तिश्च नि॰ स्योत्स्नाप्रतिहततमोवृत्तिः। निसऽस्योत्स्नाप्रतिहततमोवृत्तिभिः रम्याः। निसऽस्योत्स्ना
प्र॰ रम्याः। सदा चंद्रिकाविद्यमानत्वात् अंधकाररमणीया इत्यर्थः। चंद्रिका कौमुदी ज्योत्स्नेत्यम॰। अचकारोत्क्षि
योच्यातंतिभिः स्वंतिभिरंतमहत्स्यं। यत्र वृक्षाः सर्वे सदा वसंतः नलिनीनां च सदाकारत्वेन सरसंतो सदा
मुखांकालपन्नपश्च सदा मूर्खा चंद्ररोभिताद्दतिभावः॥ ।नेत्रानीताः इति हे॰ कायां। तादृशाः जलमुचः।
मेघाः जलैः गवाक्षैः निः पतंति निः सरंति। जलैर्मुचंतीति जलमुचः। जलमुक् धूमयोनिरपदस॰। क॰ दक
जलमुचः। सततगतिनपवनेन ... विमानाग्रभुवः नीताः। मोतखिरा ८
सदागतिरिस॰।

पस्याः पद्मिमाः तेषां। अग्रभ्रमयः पद्मिमानाग्रभ्रमयस्ताः। यौमवानं विमानो स्त्रीसू। क॰ सततगतिना। नेत्रप्रेरकेण। क
इवलःत मुचः। अलैरवानी नित्राणां सलिलैः कलिकादो बं सघऽस्वा घऽ नधिता सं कासस्या इव। अ॰ नेरव्याभ्यं वेयो
भित्र भित्र। मालिकानां कलिकाः स॰ कालेषां। दोषः सलिलैः कणोका दोषस्त्रा। राक कयास्रष्टाः। रांकास्रष्टाः। रांका
वितर्कभयपो रितिशाब्दालवः। क॰ जलमुचः। धूमोकारानुकृतिनिपुणाः। धूमस्य ऽकारः निर्गमः धूमोकारः धूमो
कारस्य अनुकृति धूमोकारानुकृतिः धूमोकारोऽनुकृतौ निपुणाः धूमोकारानुकृतिनिपुणाः। धूमनिर्गमसम
नयां कुत्रात्को इत्यर्थः। कथंतीः जलमुचः अनर्गरावद्धीस्ताइत्यर्थः। यस्यां अ॰ यां। गवाक्षमार्गैर्भ्रमलसद्दशाः न
कु रोमे धामि मिलिखितचित्रे पुजलकणार्द्रता दोषं जालजारवलिः सरंति। यथा राजा वामिचार दोषमुसा घसम
याः संतपरगेहां निःसरंतीति भावः॥ ॥अक्षय्यांतर्भवननिधयः इति। हे मेघ यत्र यस्यां अ॰ यां ~~[illegible]~~
~~याः कुलरोमे धामि मिलि [illegible]~~ वहिर्वाह्ये कामिनः पुरुषाः किंनरैः सार्द्धं प्रसह्य मतिदिनं वैभ्राजसंज्ञ उपवनं दुहैनं
नि विशांति। उपभुंजंते सेवंते वैभ्राजः आख्या यस्य तत् वैभ्राजाख्यं। क॰ कामिनः। अक्षय्यांतर्भवननिधयः। अक्ष
याः भोकुमत्राक्षय्यांतर्भवनस्य निधयो येषां ते अक्षय्यांतर्भवननिधयः। निधिर्नाम शेवधिर्भेदाः पद्मशंखादयो नि
विबुधवनितावारमुख्यासहायाः विबुधवनिताः वि॰ ताः। विबुधवनिताभ्य ता
घं सदैः। क॰ कामिनः। विबुधवनितावारमुख्याः। वि बु [illegible] रमुख्या सहाया येषां ते वि॰। देवगणा भो
वारमुख्याभ्व विबु

राम २६
मे·ट

वारांगनासहिताः इत्यर्थः। वारस्त्री गणिका वेश्या रूपाजीवा इत्यमरः। सत्कृता वारमुख्यानुद्रस्य। कः। किंनरैः। धनपतिय
शः उद्गायद्भिः। धनपतेः कुबेरस्य यशः धनपतियशः। कः। किंनरैः। रक्तकंठैः रक्तः कंठो येषां ते रक्तकंठाः तैः। रागयुक्तकंठैर
इत्यर्थः। कः। उद्बद्धं। बद्धापानं। बद्धं आपानं यस्मिन् तत् तथा बद्धापानं। बहिर्विततसुरापानमस्मिन्निति इत्यर्थः। आपानं पानगोष्ठीका
इदमंगीतानिजप्रभुकुबेरकीर्तिभिः किंनरैः सह हृता भोगिनो वने बुधा वारांगनासहिताः सन्तं तं भुंजन्तीति भावः॥ ॥मंदाकिन्याः
इत्यहे·य·यां। कन्याः मदसकन्याः मणिभिः संक्रीडन्ते क्रीडां कुर्वन्ति। कः। कन्याः। मंदाकिन्याः गंगायाः। गंगायाः अनुतटरु
तटसमीपे उत्पन्नानां मंदाराणां कल्पवृक्षाणां छायया वारितोष्णाः तटस्य समीपं अनुतटं अनुतटे रुहन्तीति अनुतटरुहः
तेषां अनुतटरुहां। वारितोष्णोपसंतापाः। वारितोष्णाः। कः। मणिभिः। कनकसिकतामुष्टिनिक्षेपगूढैः। कनकसिकता
कः। ताः कनकसिकतानां मुष्टयः। कः। मुष्टयः। कनकसिकतामुष्टिभिर्निक्षेपः। कः। निक्षेपः। कनकस्य सिकताः
नगूढाः। कैः। निक्षेपगूढाः तैः। सिकता स्युर्वालुकापीत्यमरः। कः। मणिभिः। अन्वेष्टव्यैः। मृगयितुं योग्यैरित्यर्थः। कनकसिकतामुष्टिनिक्षेपे
योग्याः अन्वेष्टव्याः तैः। कः। कन्याः। अमरप्रार्थिताः। अमरैः प्रार्थिताः अ·ताः। पु। कन्याः। मरुद्भिः सेव्यमानाः। अन्वेष्टुं
ताः। कः। मरुद्भिः। सलिलशिशिरैः। सलिलैः शिशिराः स·राः तैः। जलशीतलैरित्यर्थः। पवनैः सेव्यमा
लोकपद्धिकां क्षेपयित्वा क्रीडां कुर्वन्ति तथापि स्वकन्या गंगातटे कल्पवृक्षेषु सुवर्णे वालुकायां मणयो निक्षिप्य
तानानाक्रीडाभिः सुखं विहरन्तीति भावः॥ ॥नीवीबन्धोच्छ्वसितशिथिलं॥ स्पृष्ट्वा

२६

हे॰ प॰ धां। एकः कल्पवृक्षः सकलं अवनीमंडलं स्त्रीलां आभरणलं सूते जनयति। अवनीनां मंडलं अ॰ नं। अलंकारस्त्वाभरणं लंप
त्रि प्रकारो विभूषणं मंडनं चाथ इत्यमरः। तदेवाह। चित्रं वासांः। चतुनः नयनयोः विभ्रमादेशः। दत्ते मधुमधुंभ्य चतुनां किंशुकपैः पद्म
वैः सह पुष्पोद्गमं पुष्पोद्गमं चतुर्न मधुपराननां विकल्पौ रनानामेशानूं। चतुनः चरणकमलन्यास योग्यं नानाशाखाः। एतद
सर्वं एकः कल्पवृक्षः ददाति। वस्त्रमाल्यादनं वा सर्वे कं वसन मंजुकमिति सः। विभ्रमस्पाऽदेशः। वभ्र॰ शः। विभ्रमादेशो दद्दे
वि॰ सं। विलासकेरणनिपुणमित्यर्थः। मधुमधुपेषु रसेस॰। पद्म वीक्षि सल्पयमिति सः। पुष्पाणां उद्गमः पुष्पोद्गमः।
चरणावेव कमले च॰ के। चरणकमलयोः न्यासः च॰ सः। चरणकमलन्यासाय योग्यं च॰ योग्यं। चरणरागसदाना
हमित्यर्थः। नाशयां रागः को॰ गः। तं। नाशाराक्षाज तुलीवे याकोल कोडुमामयः इत्यल। नाभ्यः स्त्रीभ्यः सकलालंका
रादिकमभीष्टं कल्पवृक्ष एव ददाति न तु तासां उत्पादने प्रयासः इति भावः॥ ॥चन्द्रेति। हे॰ प॰ धां। चंद्रकांताः मणयः स्त्रीणां
सुरतजनितां अंगग्लानिं व्याकुंदंति। विनाशयंति। सुरते जनिता सु॰ ता। तां। अंगस्य ग्लानिः अ॰ ग्लानिः। तां। क॰ चंद्र
कांताः। चंद्रपादैः चंद्रकिरणैः चुंबिताः। स्पर्शिताः। चंद्रस्य पादाः चं॰ दाः। तैः। क॰ पादैः। जलसंरोधापगमविशदैः। तेन
२ जलसंरोधः जल॰ धः। जलसंरोधस्यापगमः जल॰ पगमः। तेन विशदैः। च॰ गमविशदाः। तैः। निरभ्राकाशात् निर्मलैरित्य
